This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

॥दिप्का॥

१८५

॥नामदेवकृता[illegible]॥

॥इदंपुस्तकंगणेशपाठकान्[illegible]॥

Acc No:- 169 M1029

Title - आचारदीप

Author:- नामदेव

Date:- 1687 A.D.

Subject:- धर्म

पेजे:- ९५

1

KKSU LIBRARY
RAMTEK
441 106
M1029
Dist. Nagpur

Checked 2012

आन्हिक॥
॥१॥

॥श्रीगणेशाय नमः॥ ॥चंचच्चासपुटस्फुटाग्निनयनव्यग्राग्रपाशाहतीस्तुभ्यन्न-
पुरमंडलुब्धानिमिलत्कापास्खलल्लंकणं॥धृगदंडविघ्न तोद्विकुपुमेवोमां
गणंमंडयन्संध्यातांडवडंबरंविरचयन्नसैगणेशोऽव्याद्व॥१॥ उक्तावाक्-
त्वेयनयाज्ञवल्क्येन धीमता॥ आचारो द्विजवर्याणां सुबोधः कथ्य तुना॥२॥
॥दक्षः॥ ॥प्रातरुत्थायकर्त्तव्यं यद्द्विजेन दिने दिने॥ तदहं संप्रवक्ष्यामि द्विजाना-
मुपकारकं॥३॥ उदयास्तमनं यावद्द्विजः सत्कर्मकृद्भवेत्॥ नित्यनैमित्तिकैर्यु-
क्तैः काम्यैश्चान्यैरगर्हितैः॥४॥ ॥मनुः॥ नामुत्र हि सहायार्थं पिता माता च
तिष्ठतः॥ न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलः॥५॥ तस्माद्धर्मसहायार्थं नित्यं

संचिनुयाच्छनैः॥धर्मेणैवसहायेनतमस्तरतिदुस्तरं॥६॥आचारःप्रथमोधर्मःश्रु
त्युक्तःस्मार्त्तएवच॥तस्मादस्मिन्समायुक्तोनित्यंस्यादात्मवान्द्विजः॥७॥आचा
राल्लभतेह्यायुराचाराल्लभतेप्रजाः॥आचाराद्धनमक्षय्यमाचारोहंतिकिल्बिषं॥
दुराचारोहिपुरुषोलोकेभवतिनिंदितः॥दुःखभागीचसततंव्याधितोल्पायुरेव
च॥९॥परित्यजेदर्थकामौस्यातांधर्मविवर्जितौ॥धर्मंचाप्यसुखोदर्कंलोकवि
द्विष्टमेवच॥१०॥लोकसंक्रुष्टंचयथामधुपर्केगवालंभादि॥उच्छ्रायेछायबो
द्ध्यंकिमप्यसुकृतंकृतं॥दत्तंवाह्यपिलंवापिकयाकूसत्यंचापिज्ञापितं॥११॥
इतिश्रीअहनागदेवविरचितेआचारदीपेआचारमात्रकाविधिः॥ ॥अथाल

भाह्निक॥ चिंतनं॥ ॥तत्रस्थ संतरे॥ ॥उपपालकसर्वेषुपालकेषुमहत्स्वपि॥ अभ्यस्तनीया
मंब्रह्मध्यानेसमारभेत्॥१॥ ॥योगी॥ ॥उरुस्थोत्तानचरणःसव्येन्यस्योत्तरंकरं॥उ
॥२॥ त्तानंकिंचिदुन्नम्यमुखंविष्टभ्यचोरसा॥२॥ निमीलाक्षःसत्त्वस्थोदंतैर्दंतानसंस्पृ
शन्॥ तालुस्थाचलजिह्वश्चसंवृतास्यःसुनिश्चलः॥३॥ संन्निरुध्येंद्रियग्रामं॥न
नीचोछ्रितासनः॥ द्विगुणंत्रिगुणंवापिप्राणायाममुपक्रमेत्॥४॥ ततोध्येयःस्थि
तोयोसौहृदयेदीपवत्प्रभुः॥ धारयेत्तत्रचात्मानंधारणांधारयेद्बुध॥५॥ ॥तथाच
ह॥ ॥द्विसप्ततिसहस्राणिहृदयादभिनिःसृताः॥ हितानामहितानाम्नस्तासांमध्येत्र ॥३॥
त्रिपत्रं॥६॥ मंडलंतत्रमध्यस्थंआत्मादीपइवाचलः॥ सज्ञेयस्तंविदित्वेहपुनराजा

यत्नेनतु॥७॥यदाचर्मवदाकाशंवेष्टयिष्यंतिमानवाः॥तदाशिवमविज्ञायदुःखस्यांतोभविष्यति॥८॥ ॥इत्यात्मचिंतनविधिः॥ ॥अथस्तुप्रज्ञातविधिः॥ ॥विष्णुः॥ ॥गृहमेधिनियमोक्तंस्वर्गसाधनमुत्तमं॥ब्राह्मेमुहूर्त्तेउत्थायतत्सर्वंसम्यगाचरेत्॥१॥नाडिकाषट्कंचपंचाशत्प्रातस्त्वेकाधिकोरुणः॥उषाकाळोऽष्टपंचाशच्छेषःसूर्योदियस्मृतः॥२॥ ॥व्यासः॥ ॥प्रातःस्मरामिभवभीतिमहार्त्तिशांत्यैनारायणंगरुडवाहनमब्जनाभं॥ग्राहाभिभूतवरवारणमुक्तिहेतुंचक्रायुधंतरुणवारिजपत्रनेत्रं॥३॥ प्रातर्नमामिमनसावचसाचमूर्ध्नापादारविंदयुगुलंपरमस्यपुंसः॥नारायणस्यनरकार्णवतारणस्यपारायणप्रवरविप्रपरायणस्य॥४॥प्रातर्भजामि

B

ऽतामत्र[illegible]करंतंप्राक्सर्वजन्मकृतपापभयापहत्यै ॥ योग्राहवक्त्रपतितांघ्रिगजेंद्रघो
रशोकप्रणाशनकरोधृतशंखचक्रः ॥५॥ श्लोकत्रयमिदंपुण्यंप्रातःप्रातःपठेन्नरः ॥
लोकत्रयगुरुस्तस्मैदद्यादात्मपदंहरिः ॥६॥ ॥इतिसुप्रभातविधिः॥ ॥अथमूत्र
पुरीषोत्सर्गविधिः॥ ॥पराशरः॥ ॥ततःप्रातःसमुत्थायकुर्याद्विण्मूत्रमेवच॥
नैऋत्यांदिशिविक्षेपमतीत्याभ्यधिकंतुवः ॥१॥ कृत्वायज्ञोपवीतंतुपृष्ठतःकंठनि
श्रितं ॥ विण्मूत्रंतुगृहीकुर्यात्कर्णस्थःप्रथमाश्रमी ॥२॥ ॥हारीतः॥ ॥उच्चारेमै
थुनेचैवप्रस्रावेदंतधावने ॥ स्नानेभोजनकालेषुषट्सुमौनंसमाचरेत् ॥३॥ ॥
अंगिराः॥ ॥संध्ययोरुभयोर्जप्येभोजनेदंतधावने ॥ पितृकार्येचदैवेच

तथामूत्रपुरीषयोः ॥४॥ गुरूणां संनिधौ दाने योगे चैव विशेषतः ॥ एषु मौनं समाति
ष्ठन्स्वर्गमाप्नोति मानवः ॥५॥ ॥मनुः॥ ॥द्विजो मूत्रपुरीषं च दिवा कुर्यादुदङ्मुखः॥
दक्षिणाभिमुखो रात्रौ संध्ययोश्च यथा दिवा ॥६॥ पीडायामंधकारे या रात्रावहनि
वा द्विजः ॥ यथासुखमुखः कुर्यात्प्राणबाधाभयेषु च ॥७॥ वाय्वग्निविप्रमादित्य
मनपः पश्यंस्तथैव गच ॥ न कदाच न कुर्वीत विण्मूत्रस्य विसर्जनं ॥८॥ न फालकृष्टे
न जले न चित्यां न च पर्वते ॥ न जीर्णदेवायतने न वल्मीके न शाद्वले ॥९॥ न स
सत्वेषु गर्त्तेषु न गच्छन्नपथि स्थितः ॥ न नदीतीरमासाद्य न च स्मानि न गोमये ॥१०॥
॥ङ्गोरवः॥ ॥मूत्रपुरीषे नो कुर्यात्सोपानस्थः कथंचन ॥ उद्धृत्य मड्डलं कुर्यात्स्थला

5

आन्हि॰
॥४॥

यं मेहनं द्विजः ॥११॥ अनन्तमनिच विण्मूत्रं काष्ठलोष्ठतृणादिना । उदस्त्रयासाउत्तिष्ठेत्
द्दष्टं विध्वंसनमेहनः ॥१२॥ ॥इति मुत्रपुरीषोत्सर्गविधिः॥ अथ शौचविधिः॥ ।
स्तः॥ ॥शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः॥ शौचाचारविहीनस्य समस्ता
निःफलाः क्रियाः ॥१॥ ॥मनुः॥ ॥अंतर्जलाद्देवगृहाद्वल्मीकान्मूषकोत्किरात्॥
कृतशौचावशिष्टाश्च न ग्राह्याः पंच मृत्तिकाः ॥२॥ आहृतामन्यशौचार्थं याल्मुकापांसु
रूपिणी॥ न मार्गान्नरमस्थानानाद्यानदद्यात्कुड्यतः क्वचित्॥३॥ ॥यमः॥ ॥आहरे
न्मृत्तिकां प्राज्ञः कूलतः सरितां तथा॥ वापीकूपतडागेषु नाहरेद्बाह्यमृत्तिकां॥४॥ आह
रेज्जलमध्यस्थां परतो मणिबंधनात्॥५॥ ॥शातातपः॥ ॥शुचिदेशात्तु संग्राह्याशो

॥४॥

कैराश्मादिविवर्ज्जिताः॥ गोरिस्कातयाश्चेतात्रिविधामृत्तिकास्मृताः॥६॥ ॥वसि[illegible]ः॥ ॥
एकालिंगेगुदेतिस्रस्तउभयोर्मृद्वयंस्मृतं॥ मूत्रशौचंसमाख्यातंशुक्रेतद्विगुणं[illegible]त्॥८॥
पंचापानेदशैकस्मिन्नुभयोःसप्तमृत्तिकाः॥ एतच्छौचंगृहस्थस्यद्विगुणंब्रह्मचारि
णः॥ वानप्रस्थस्यत्रिगुणंयतीनांचचतुर्गुणं॥९॥ अर्धप्रसृतिमात्रातुप्रथमामृ
त्तिकास्मृता॥ द्वितीयाचतृतीयाचतदर्धार्धंप्रकीर्तिता॥१०॥ लिंगेप्यत्रसमाख्याता
त्रिपर्वपूर्यतेयया॥ दातव्यमुदकंतावन्मृदाभावोयथाभवेत्॥११॥ तीर्थेशौचं
नवैनैकुर्वीनकुर्वीतोद्धृतवारिणा॥ अरत्निमात्रंजलंत्यक्त्वाकुर्याच्छौचमनुद्धृते॥१२॥
पश्चाच्चशोधयेत्तीर्थमन्यथाह्यशुचिर्भवेत्॥ ॥दक्षः॥ ॥यदिवाविहितंशौचंन

दर्धं निशि माचरेत् ॥ तदर्धमातुरे प्रोक्तं मातुरस्यार्धमध्वनि ॥१४॥ ॥आदिपुरा
णात् ॥ ॥स्त्रीशूद्रयोरर्द्धमानं शौचं प्रोक्तं मनीषिभिः ॥ बालस्यानुपनीतस्य
गंधलेपक्षयावहं ॥१५॥ कृत्वाथ शौचं प्रक्षाल्य हस्तौ पादौ च मृज्जलैः ॥ निब
द्धशिखकच्छस्तु द्विज आचमनं चरेत् ॥१६॥ ॥स्मृत्यंतरं ॥ ॥गंगातोयेन
कृत्स्नेन मृद्भारैः पर्वतोपमैः ॥ आमृत्योराचरन् शौचं भावदुष्टो न शुध्यति ॥१७॥
अरण्ये निर्जले रात्रौ चौरव्याघ्राकुले पथि ॥ कृत्वा मूत्रपुरीषं तु द्रव्यहस्तो न दु
ष्यति ॥१८॥ ॥इति शौचविधिः ॥ ॥अथाचमनविधिः ॥ ॥तत्र य[illegible]ल्क्यः ॥ ॥
अंतर्जानुः शुचौ देशे उपविष्ट उदङ्मुखः ॥ प्राग्वा ब्राह्मेण तीर्थेन द्विजो [illegible]मु

स्मृं २

ना

पस्पृशेत् ॥१॥ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च ॥ प्रजापतिपितृब्राह्मदेव
तीर्थान्यनुक्रमात् ॥२॥ हृत्कं॰तालुगाभिश्च यथासंख्यं द्विजातयः ॥ शुद्ध्येरं स्त्री च
शूद्रश्च सकृत्स्पृष्टाभिरंततः ॥३॥ ॥संवर्त्तः॥ ॥अशब्दाभिरनुष्णाभिः स्वच्छा
भिः फेनबुद्बुदैः ॥ आपन्नानां शुद्धिः स्याद्दुःखेन स्नातपायिनां ॥४॥ ॥बौधायनः॥ ॥
पादक्षालनशेषेण नाचामेद्वारिणा द्विजः ॥ भुञ्जानो वे पिबेत्किंचित्स्पृष्टान्नमो
लुतज्जलं ॥५॥ ॥आपस्तंबः॥ ॥संध्यार्थं भोजनार्थं वा पित्रर्थं नतयैव च ॥
शूद्रानीतेन नाचामेदुपानहिवनेषु च ॥६॥ ॥भरद्वाजः॥ ॥संहतांगुलिना
तोयं पाणिना दक्षिणेन च ॥ मुक्तांगुष्ठकनिष्ठाभ्यां द्विज आचमनं चरेत् ॥७॥

⑥

॥आन्हिक॥

॥६॥

॥दक्षः॥ ॥प्रक्षाल्यपादौहस्तौचत्रिःपिबेदंबुवीक्षितं॥संमृज्यांगुष्ठमूलेनद्विःप्रमृ
ज्यात्ततोमुखं॥९॥ ॥यमः॥ ॥तावन्नोपस्पृशेद्विप्रोयावद्वामेननस्पृशेत्॥वामे
हिद्वादश्यादित्सावरुणाक्छउश्वेश्वरः॥पुं॥ ॥मनुः॥ ॥खानिचोपस्पृशेदद्भिरा
त्मानंशिरएवच॥संहताभिश्चतुर्भिश्चपूर्वमास्यमुपस्पृशेत्॥१०॥देशिन्यंगुष्ठ
युग्माभ्यांनासारंध्रद्वयंस्पृशेत्॥अंगुष्ठानामिकाभ्यांचचक्षुःश्रोत्रंचविन्यसेत्॥११॥
नाभिंकनिष्ठिकांगुष्ठाभ्यांहृदयंतुतलेनवै॥अंगुलीभिश्चसर्वाभिःशिरोबाहूचसं
स्पृशेत्॥१२॥अनेनैवविधानेनआचांतःशुचितामियात्॥१३॥ ॥दक्षः॥ ॥उदके
चोदकस्थस्तुस्थलउस्थस्तुस्थलेशुचिः॥पादौस्थाप्योभयत्रैवआर्द्रवासानवेचदि॥१४॥

॥६॥

॥योगीश्वरः॥ ॥स्नात्वापीत्वाक्षुतेसुप्तेभुक्त्वारथ्योपसर्पणे॥आचांतःपुनराचामेद्वासोवि
परिधायच॥१५॥ ॥स्मृत्यंतरं॥ ॥अकृत्वापादशौचंतुतिष्ठन्मुक्तशिखोपिवा॥विनाय
ज्ञोपवीतेनआचांतोप्यशुचिर्भवेत्॥१६॥सोपानत्कंचुस्थलगोपीपर्यंस्यासनयानगः॥
दुर्देशोपवंदस्थोवनाचामंशुद्धिमाप्नुयात्॥१७॥रथगोनरयानस्थःहस्त्यश्वारोह
कस्तथा॥आचांतःकर्मशुद्धःस्यात्तांबूलोषधिउग्धिकृत्॥१८॥अधोवायुसमुत्स
र्गेआक्रोशेक्रोधसंज्ञये॥मार्जारमूषकस्पर्शेआचांतस्तुशुचिर्भवेत्॥१९॥नु
त्कासनस्थोप्याचामेन्नान्यकालेकदाचन॥नपादुकस्थोनचरन्नचायज्ञोपवी
तवान्॥२०॥ ॥रा धायनः॥ ॥स्नानमाचमनंहोमंभोजनंदेवतार्चनं॥प्रौढपा

॥आह्निक॥
॥७॥

ध्यासीनो नकुर्वीतस्थौयंपि च तर्पणं॥२१॥आसनारूढपादस्तु जान्वोर्वाजंघयोस्तथा॥कृता
वसक्थिकेयश्चप्रौढपादःसउच्यते॥२२॥ ॥पराशरः॥ ॥क्षुते निष्ठीवनेचैवदंतोच्छि
ष्टेतथानृते॥पतितानांचसंभाषेदक्षिणंश्रवणंस्पृशेत्॥२३॥अग्निरापश्चवेदाश्चसो
मःसूर्योनिलस्तथा॥सर्वएवहिविप्रस्यकर्णेतिष्ठंतिदक्षिणे॥२४॥ ॥इत्याचमनविधिः॥
॥अथदंतधावनविधिः॥ ॥दक्षः॥ ॥मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः॥तदा
र्द्रकाष्ठंशुष्कंवाभक्षयेद्दंतधावनं॥१॥कंटकीक्षीरवृक्षोत्थंद्वादशांगुलमव्रणं॥कनिष्ठि
काग्रवत्स्थूलंपर्वार्धकृतकूर्चकं॥२॥ ॥स्मृत्यंतरात्॥ ॥जंबूदुंबरचूताश्चकदंबोलोध्र ॥७॥
चंपकाः॥बदरीतिंदुमास्त्वेतेप्रोक्तादंतप्रधावने॥३॥सोनागपुंनागबकुलंदंतलक्ष्मीस्त

२२

ज्ञोदष्टाम्कृतिः॥क्रमाच्चवल्कळंप्रोक्तंतरुमेर्दंतधावने॥४॥ ॥गर्गः॥ ॥द्वादशांगुळंच
विप्राणांक्षत्रियाणांनवांगुळं॥अष्टांगुळंतुवैश्यानांशूद्राणांसप्तसंमितं॥५॥
चतुरंगुळमानंतुनारीणांदंतधावनं॥६॥ ॥विष्णुः॥ ॥सूक्ष्मंतुहीनदंतस्य
समदंतस्यमध्यमं॥स्थूळंविरळदंतस्यत्रिविधंदंतधावनं॥७॥अग्रंघिस
त्वचंकृत्वांकीटाग्नीन्विरदूषितं॥प्राङ्मुखस्तूपविष्टश्चऋक्षयेद्धाःपलोनरः॥८॥
॥गर्गः॥ ॥प्राङ्मुखस्कुध्मतिंसोख्यंशरीरारोग्यमेवच॥दक्षिणेनतथाकष्टं
पश्चिमे नपराजयं॥९॥उत्तरेणगवांनाशंस्त्रीणांपरिजनस्यच॥१०॥
अंन्नाद्याय ह्ध्वंसोमोराजायमागमत्॥सममुखंप्रमार्ष्यतेयशसाच

न्गेनच॥११॥ आयुर्बलंयशोवर्चःप्रजापशुवसूनिच॥ब्रह्मप्रज्ञांचमेधांचत्वंन्नोदेहिव
नस्पते ॥१२॥ ॥दंतधावनमंत्रः॥ ॥विष्णुः॥ ॥प्रक्षाल्यो द्भक्षयेच्चोदङ्मुखो दंतधावनमु
त्सृजेत्॥पतितामिमुखेसम्यक्कृत्वोऽप्यप्राप्नोत्यनीप्सितं॥१३॥अनायेदंतकाष्ठस्य
निषिद्धदिवसेषुच॥अपांद्वादशगंडूषैर्विदध्याद्दंतधावनं॥१४॥चतुर्दश्यष्टमीद
र्शपूर्णिमासंक्रमेषुच॥नंदासुचनवम्यांचनकुर्याद्दंतधावनं॥१५॥ ॥वृद्धमनुः॥ ॥
वि श्चनिरंगारकश्चैवरविशुक्रस्तथैवच॥दंतानांकाष्ठसंयोगाद्दहत्यासप्तमंकुलं॥१६॥ ॥
॥ ॥यमः॥ ॥श्राद्धेजन्मदिनेचैवविवाहेऽजीर्णदंतके॥व्रतेचैवोपवासेचनकुर्याद्दंतधा
वनं॥१७॥ ॥व्यासः॥ ॥[illegible]श्रुध्यर्थजानरूत्थायनभक्षयेद्दंतधावनं॥श्राद्धेयज्ञेचनियमा

त्वनार्ये प्रोषितभर्तृका॥१८॥ ॥मरीचिः॥ ॥नाद्यादजीर्णीवमथुकासश्वासज्वरार्दितः॥
तृष्णास्यपाकहृन्नेत्रशिरःकर्णामयी च तत्॥१९॥ ॥वृद्धयाज्ञवल्क्यः॥ ॥इष्टकालोष्टपाषाणै
रितरैरंगुलिभिस्तथा॥मुक्त्वा चानामिकांगुष्ठौ न कुर्याद्दन्तधावनं॥२०॥ ॥पैठीनसिः॥ ॥तृ
णपर्णोदकेनांगुल्या दन्तान्धावयेत्प्रदेशिनीवर्जं॥२१॥ ॥वराहः॥ ॥अङ्गुलानपृथ्वीलिनदं
तधा॥ काष्ठान्यथान्नपत्रैश्च समश्चितानि॥ न युग्मपत्राणि न पाटितानि न चार्ध्वशुष्काणि वि
नाल्वचानि॥२२॥ ॥यमः॥ ॥मध्याह्नस्नानवेलायां यो न क्षेद्दन्तधावनं॥ निराशास्तस्य
गच्छंति देवताः पितृभिः सह॥२३॥ ॥इति धदन्तधावनविधिः॥ ॥अथ यज्ञोपवीतवि
धिः॥ मनुः॥ ॥कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्॥ स्थाने पवित्रे संस्थोरथाय

8

आन्हिक॥

॥ १९ ॥

ष एनयस्संगुलीषुतन्तू ॥१॥ त्रिवृदूर्ध्ववृतंकार्यंतंतुत्रयमधोवृतं ॥ त्रिवृतंचोपवीतंस्यात्तत्रै
कोग्रंथिरूच्यते ॥२॥ सावित्र्याचत्रिवृत्कुर्यान्नवसूत्रंतुतद्भवेत् ॥ ॐकारश्चाग्निनागो
चसोमःपितृप्रजापती ॥ वायुःसूर्यःसर्वदेवाइत्याकुस्तंतुदेवताः ॥३॥ त्रिवृछिन्नमधो
यातमनध्यायेत्कृतंचयत् ॥ कृतंचाशुचिनायच्चतुल्कानिर्भिन्नमुत्सृजेत् ॥४॥ ॥य
ज्ञोपवीतमितिमंत्रः ॥ ॥स्नानादूर्ध्वमधोनालेस्तन्नधार्यंकथंचन ॥ पृष्ठवंशेचनाभ्यां
चधृतंयद्विंदतेकटिं ॥५॥ यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि ॥ वस्त्राभावेतृ
तीयंतुएकंचप्रथमाश्रमे ॥७॥ उपवीतमलंकारंस्रजंकरकमेवच ॥ उपानहोचवा
सश्चधृतमन्यैर्नधारयेत् ॥८॥ मेखलामजिनंदंडंउपवीतंकमंडलुं ॥ अप्सुप्रास्य

॥ १९ ॥

ध्विनष्टानि घृताचान्यानिमंत्रतः॥ ९॥ ॥इतियज्ञोपवीतविधिः॥ अथदर्भविधिः॥ ॥
॥तत्रकात्यायनः॥ ॥मासेनभस्यमावास्यातस्यांदर्भोच्चयःस्मृतः॥ अयातयाम
दर्भाश्चनियुक्त्याःपुनःपुनः॥१॥ शुचौदेशेशुचिर्भूत्वाविप्रःपूर्वोत्तरामुखः॥ ॐका
रेणचमंत्रेणसकृद्देवकुशंस्पृशेत्॥२॥ सप्तपत्राःशुभादर्भाःस्थिलक्षेत्रसमुद्भवाः॥
अच्छिन्नाग्राश्चशुक्लायाप्रादेशायाःप्रमाणतः॥३॥ कुतपाइतिविख्यातास्तैःश्राद्धंस
माचरेत्॥ ॥दर्भमंत्रः॥ विरंचिनासहोत्पन्नःपरमेष्ठीनिसर्गजः॥ नुदसर्वाणिपापानि
नवस्वस्तिकरोमम॥५॥ ॥सुमंतुः॥ ॥कुशाःकाशाःशरोगुंथयवादूर्वाश्चबल्बजाः॥
गोकेशामुंजौकुंदश्चपर्यालाभेपुरःपुरः॥६॥ समूलायोधिगर्भौतौकुशौद्वौदक्षिणेकरे॥
सव्येचैवतथात्रीणिबिभृयात्सर्वकर्मसु॥७॥ ॥हारीतः॥ ॥स्नानेदानेजपेहोमस्वाध्याये

छि

हेमा॥ पित्तर्पणे ॥ पवित्रंतुकरेकृत्वासौवर्णंराजतंचवा ॥ ८ ॥ चतुर्भिर्दर्भविदलैः पवित्रंब्राह्मणस्य
१०॥ तु ॥ एकैकंन्हासयेत्तुवर्णेवर्णेयथाक्रमं ॥ ९ ॥ ॥शांखः॥ ॥ब्रह्मयज्ञेजपेचैवब्रह्मग्रंथि
र्विधीयते ॥ भोजनेवर्तुलःप्रोक्तः एवंधर्मोनहीयते ॥ १० ॥ त्रिगुणीकृत्यसूत्रंतुत्रिवृत्यासं
निपोडयेत् ॥ ब्रह्मग्रंथिःसविज्ञेयःसर्वमौंज्यादिकर्मसु ॥ ११ ॥ मूलपर्वणिकुर्वाणोम
हत्साहीयतेश्रिया ॥ मध्यपर्वणिकुर्वाणःपुत्रदारैर्वियुज्यते ॥ १२ ॥ अनामिकाग्रपर्वस्थं
पवित्रंबिभृयात्सदा ॥ अग्रपर्वग्रहणंचकाम्यरूपविषयं ॥ १३ ॥ सपवित्रेणहस्तेनकु
र्यादाचमनक्रियां ॥ नोच्छिष्टंतत्पवित्रंस्यात्भुक्तोच्छिष्टंविवर्जयेत् ॥ १४ ॥ कुशाग्रंपिबेत्तो ॥१०॥
यंकुशाग्रतमुपस्पृशेत् ॥ कुशास्तोनिस्तरंतोयंसोमपानंदिनेदिने ॥ १५ ॥ कुशामूलेवसे
द्ब्रह्माकुशामध्येजनार्दनः ॥ कुशाग्रेशंकरश्चैवकुशांस्तस्मात्तुधारयेत् ॥ १६ ॥ नीविम

छेनुयेदर्भाब्रह्मसत्रेचयेधृताः॥पवित्रांस्तान्विजानीयाद्यथाकायस्तथाकुशाः॥१७॥

च २ अपूतागर्भिताहर्भायेचान्येछिंनानखैः॥मार्गजाश्चाग्निदग्धाश्चकुशायत्नेनवर्जये

त्॥१८॥ ॥हारीतः॥ ॥समित्कुशांश्चपुष्पादिविप्रोत्रियःस्वयमाहरेत्॥शूद्रानी

तैःक्रयक्रीतैःकर्मकुर्वन्व्रजत्यधः॥१९॥ ॥इतिदर्भविधिः॥ ॥अथप्रणवविधिः॥ ॥

नत्रकात्यायनः॥ ॥ॐकारस्यऋषिर्ब्रह्मापरमात्माथदेवता॥गायत्रीचभवेच्छंदो च ३

नियोगःसर्वकर्मसु॥१॥ ॥याज्ञवल्क्यः॥ ॥अकारंचाप्युकारंचमकारंप्रजा

पतिः॥वेदत्रयरहस्यंचभूर्भुवःस्वरितीतिच॥२॥प्रणवाद्यास्त्रयोवेदाःप्रणवाद्यं

चराचरं॥वाङ्मयंप्रणवंसर्वंतस्मात्प्रणवमभ्यसेत्॥३॥अकारःप्रथमामात्रा

ःदृक०

॥११॥ द्वितीयोकारसंज्ञिता ॥ मकारमात्रात्वंस्याचनादेत्वात्माप्रतिष्ठितः ॥४॥ प्रथमायान्वेन्मात्रा
रक्तावैब्रह्मदेवता ॥ जाग्रद्वृत्तौस्थितानित्यंविज्ञेयासानिरंजना ॥५॥ द्वितीयायान्वेन्मा
त्राकृष्णावैविष्णुदेवता ॥ स्वप्नवृत्तौस्थितानित्यंविज्ञेयासानिरंजना ॥६॥ तृतीयायान्
वेन्मात्राशुक्ला वैरुद्रदेवता ॥ सुषुप्तिवृत्तौस्थितानित्यंविज्ञेयासानिरंजना ॥७॥ त्रिमा
त्रास्तुप्रयोक्तव्या आरंभेसर्वकर्मसु ॥ त्रिस्वरःसाधलुकर्त्तव्यामात्रातत्वार्थचिंतमेः ॥८॥
तैलधारामिवाछिन्नंदीर्घघंटानिनादवित् ॥ अथाह्वंप्रणवस्यायंयस्तंवेदसवेदवित् ॥
॥९॥ ऋग्वेदस्वरितोदात्तःएकाक्षरउदाहृतः ॥ त्रिस्वरश्चांतोदात्तश्चयजुर्वेदेतुपठ्य ॥११॥
ते ॥१०॥ दीर्घप्लुतःसामवेदेॐकारोनात्रसंशयः ॥ संक्षिप्तोदात्तमेवाहुःएकाक्षर

उदाहृतः ॥११॥ अथर्ववेदेषु दिष्ट ॐकारो नात्र संशयः ॥ अकारेण पदोंकारः प्रवि
ष्टस्त्वेकधान्नयेत् ॥१२॥ अउवर्णसमायोगाद्धोंकारमुपपद्यते ॥ अनुस्वारमका
रं च ॐकारस्य शिरो यदा ॥१३॥ प्रकृतिः साधनं हलाव्यंजनाहे च लुप्यते ॥ नपुं
सकस्तदोंकारो वदंतानानाप्रकीर्त्तितः ॥ एवं यो विंदते विप्रो मुच्यते सर्वबंधना
त् ॥१५॥ स्वदेहमरणिं कृत्वा प्रणवश्चोत्तरारणिः ॥ ध्याना निमंथनाभ्यासादेवं पश्ये
न्निगूढवत् ॥१६॥ प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ॥ अप्रमत्तेन बोद्धव्यं शरव
त्तन्मयो भवेत् ॥१७॥ ॐकारेण तथा ह्यात्मा ध्यात्वा देवः प्रसीदति ॥ एतदालंबनं
श्रेष्ठमेतदालंबनं परं ॥१८॥ एत दालंबनं ज्ञात्वा ब्रह्मभूयाय कल्पते ॥ जहद्वविग्रहो

क।।

देयोनयेद्भाखोनिरामयः।।तस्योंका रस्स्तंनामतेनाहृतःप्रसीदति।।२०।।तस्मादोंकौरे
२।। मिलिपूर्वंतुष्कृत्वायुंडीततत्परं।।ब्रह्म विधेम वि धिनासततंप्रतिपद्यते।।२१।।
।। ।।दक्षः।। ।।कृत्वापर्यंकबंधंकरकम ठपुटंन्यस्तमुत्संगदेशेनासाग्रध्यानचक्षुस्थि
तिनिभृतपदंनिश्चलंस्वस्थकायं।।पश्येयदोंकारमयंसन्नयेतिसुकृतीयोगमार्गानुरीत
त्वज्ञानेनसम्यक्नुविनुवनमिदंमंडलंयातिजित्वा।।२२।। ।।योगी।। ।।सर्वमंत्राधिराजे
नॐकारोनात्रसंशयः।।यत्स्तनंचातिरिक्तंचयच्छिद्रंपदवर्जितं।।२३।।परमेध्यमशुद्धंच
पालयामंचपक्ववेत्।।तदोंकारप्रयोगेणसर्वंचाधिकंनयेत्।।२४।।साधनंसर्वंका ।।१२।।
र्याणांयदोंकारेणसंयुतं।।सर्वमंगळमांगल्यंसर्वध्यानमयंप्रभुं।।२५।।पावनंमोक्षदंपु

एपंपापोछेद्करंतथा ॥ विदित्वामुच्यतेक्षिप्रंजन्मसंसारबंधनात् ॥ २६ ॥ एतत्संक्षेपतःप्रो
क्तंप्रणवगुणवर्णितं ॥ विस्तरेणानशक्येतवक्तुंवर्षशतैरपि ॥ २७ ॥ ॥ इतिप्रणवपद्धतिः ॥ ॥
अथशिखाबंधनविधिः ॥ ॥ तत्रन्यासः ॥ ॥ स्मृत्वोंकारंचगायत्रींनिबध्नीयाच्छिखांद्विजः ॥
१८ पुनराचम्यहृदयंबाहूस्कंधौचसंस्पृशेत् ॥ १ ॥ ॥ चतुर्विंशतिमृतात् ॥ ॥ मानस्तोकेतिमंत्रेण
शिखाबंधैमाचरेत् ॥ जपंहिंसंतिविप्राणांरक्षाकूर्मविवर्जनात् ॥ २ ॥ ॥ योगीश्वरः ॥ येप
नक्रांतास्त्रयोलोकादानवाश्चवशीकृताः ॥ शारएपंसर्वलोकानांसमेविष्णुःप्रसीदतु ॥ ३ ॥
॥ इतिशिखाबंधनविधिः ॥ ॥ अथप्राणायामपद्धतिः ॥ ॥ स्मृत्संतरं ॥ ॥ व्याहृतीनांतुस
सानांऋषिर्दैवतमुच्यते ॥ छंदांसिविनियोगश्चकथितोवेदपारगैः ॥ १ ॥ विश्वामित्रोजम
दग्निर्भरद्वाजोथगोतमः ॥ अत्रिर्वसिष्ठःकश्यपोमुनयःसप्तकीर्तिताः ॥ २ ॥ ॥ योगी ॥ ॥

गायत्र्युष्णिगनुष्टुप्‌बृहतीपंक्तिरेवच॥ त्रिष्टुप्चजगतीचैवछंदांस्येतानिसप्तवै॥३॥ अग्नि
र्वायुस्तथादित्योवास्पतिर्वरूणस्तथा॥ इंद्रश्चविश्वेदेवाश्चदेवताःसमुदाहृताः॥४॥
योगी॥ ॥अग्निरेवमुखंयस्याविश्वामित्रऋषिस्तथा॥ सवितादेवताचैवगायत्रीत्रि
पदाहिसा॥५॥ ॥व्यासः॥ ॥ॐआपोज्योतिरित्येषमंत्रोवैतैत्तिरीयके॥ तस्यप्रजाप
तिश्चार्षछंदोहीनःप्रपछ्लनः॥६॥ ब्रह्माग्निर्वायुसूर्यश्चदेवताःसमुदाहृताः॥ प्राणस्यायतने
चैवनियोगःपरिकीर्तितः॥७॥ ॥कात्यायनः॥ ॥सव्यःसोपग्रहःकार्योदक्षिणःसपवित्रकः॥
रक्षेत्तुवारिणात्मानंपरिक्षिप्यसमंततः॥८॥ ॥कूर्मपुराणात्॥ ॥प्राणःस्वदेहयोवायु-
रायामत्तंनिरोधनं। उत्तमाधममध्यत्वात्त्रिविधःप्रतिपादितः॥९॥ ॥मात्राद्वादशकोमंद
श्चतुर्विंशतिमध्यमः॥ षट्त्रिंशन्मात्रकोज्ञेयोह्युत्तमास्तुनिक्तिःसह॥१०॥ अधमेद्वादशाप्रो

क्राः मध्यमे द्विगुणा मताः। उत्तमे त्रिगुणा मात्राः प्राणायामः स उच्यते ॥११॥ प्रस्वेदकंपनोत्थानजन
कत्वं यथाक्रमं ॥ मंदमध्यममुख्यानामानंदात्मोत्तमोत्तमः ॥१२॥ ॥योगी॥ ॥अंगुष्ठांगुलिमोक्षास्त्रि
र्जानुनः परिमार्जनं ॥ कालत्रयमपिज्ञात्वा मात्रासंज्ञं प्रचक्षते ॥१३॥ देशकालानुसारेण मात्राः
सेव्याः शनैः शनैः ॥ ॥स्मृत्यंतरात्॥ ॥कंठाविड्ढिः कलाप्रोक्ता विह्लुराद्वप्रमाणिका ॥ अतः प्राणा
यमस्यादौ विस्फुराद्वेन गच्छते ॥१६॥ दक्षिणे रेचयेद्वायुं वामेनापूरितोदरं ॥ कुंभेन धारयेन्नित्यं
प्राणायामं विदुर्बुधाः ॥१६॥ पीडयेद्दक्षिणां नाडीमंगुष्ठेन तथोत्तरं ॥ कनिष्ठानामिकाभ्यां च म
ध्यमां तर्जनीं त्यजेत् ॥१७॥ ॥बृहस्पतिः॥ ॥अनामिकाकनिष्ठा च अंगुष्ठश्चतलीयकः ॥ नासि
कायां नियुंजीत तर्जनीं मध्यमां विना ॥१८॥ ॥कूर्मपुराणे ईश्वरगीतासु॥ ॥रेचकः पूरक
श्चैव प्राणायामोथ कुंभकः ॥ प्रोच्यते सर्वशास्त्रेषु योगिभिर्यतमानसैः ॥१९॥ रेचकः सृजते

ान्हिक ॥

॥ १४ ॥

वायुः पूरकस्तेनिरोधकः ॥ साम्येन संस्थितिर्यस्मात्कुंभकः परिकीर्तिते ॥ २० ॥ ॥ योगी ॥ ॥ नी
लोत्पलदलश्यामं नाभिमध्ये प्रतिष्ठितं ॥ चतुर्भुजं महात्मानं पूरके चिंतयेद्धरिं ॥ २१ ॥ कुंभके तु हृ
दिस्थाने ध्यायेत्तु कमलासनं ॥ ब्रह्माणं रक्तगौरांगं चतुर्वक्त्रं पितामहं ॥ २२ ॥ रेचके शंकरं ध्याये
ल्ललाटस्थं महेश्वरं ॥ शुद्धस्फटिकसंकाशं निर्मलं पापनाशनं ॥ २३ ॥ पूरके विष्णुसायोज्यं कुं
भके ब्रह्मणोंतिकं ॥ रेचकेन तृतीयं तु प्राप्नुयादीश्वरं पदं ॥ २४ ॥ सव्याहृतिः सप्रणवां गायत्रीं शि
रसा सह ॥ त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते ॥ २५ ॥ ॥ कूर्मपुराणे ईश्वरगीतासु ॥ ॥
स एव द्विविधः प्रोक्तः सगर्भोऽगर्भ एव च ॥ सगर्भमाहुः सजपमगर्भमजपं तथा ॥ २६ ॥ एत ॥ १४ ॥
द्धि योगिनामुक्तं प्राणायामस्य लक्षणं ॥ ॐमिति व्याहृतं विप्रो यथाविधि समाहितः ॥ प्रा
णायामैस्त्रिस्त्रिः पश्चात्तत्क्षणात्तु क्ष्पलेग्निवत् ॥ २९ ॥ यथा पर्वतधातूनां दोषं दहति पावकः ॥ ७ ॥

एवमंतर्गतंपापंप्राणायामेनदह्यते।।२०।।ब्रह्महाचसुरापश्चगुरुतल्पगएवच।सुवर्णस्तेयीचो
रश्चगोघ्नोविश्वासघातकः।।२१।।शरणागतघातीचकूटसाक्षीह्यकार्यकृत्।।एवमादिषुचा
न्येषुपापेष्वभिरतानराः।।२२।।प्राणायामशतंकृत्वासर्वस्मादनंप्रति।।निर्मलाःस्वर्गमायांति
संतःसुकृतिनोयथा।।२३।। ।।मानसवाचिकपापविषयं।।कायिकेमहाप्रायश्चित्तश्रवणात्।। ।।य
दन्हाकुरुतेपापंकर्मणामनसागिरा।।त्रिकालसंध्याकरणात्प्राणायामैर्व्यपोहति।।२५।। ।।अ
बुद्धिकृताल्पविषयंचैतत्।। ।।इतिप्राणायामविधिः।। ।।अथप्रातःस्नानविधिः।। ।।योगी।। ।।
प्रातर्मध्याह्नयोःस्नानंवानप्रस्थगृहस्थयोः।।यतेस्त्रिषवणंप्रोक्तंसकृत्तुब्रह्मचारिणः।।१।। ।।व्या
सः।। ।।स्नानंतुद्विविधंप्रोक्तंमुख्यगौणप्रभेदतः।।तयोस्तुवारुणंमुख्यंतत्पुनःषड्विधंभवेत्।।२।।
।।शंखः।। ।।नित्यंनैमित्तिकंकाम्यंक्रियांगंमलकर्षणं।।क्रियास्नानंतथाषष्ठंमुनिभिःपरिकीर्तितं।।३।।

क॥

१५॥

॥मार्कंडेयः॥ ॥अस्नातस्यक्रियाःसर्वाभवंतीहाफल्यायतः॥प्रातःसमाचरेत्स्नानंतस्मान्नित्यमितिस्मृ
तं॥४॥ ॥शंखः॥ ॥अस्नातश्चपुमान्नार्होजपाग्निहवनादिषु॥प्रातःस्नानंतदर्थंवैनित्यस्ना
नंप्रकीर्तितं॥५॥उछिष्टाद्युपघातादौस्नानंनैमित्तिकंस्मृतं॥चंद्रसूर्योपरागादौतथैवचगृह
सूतके॥६॥पुष्यस्नानादिकंस्नानंदैवज्ञविधिचोदितं॥तद्धिकाम्यंसमुद्दिष्टंनाकामस्तत्प्रयो
जनं॥७॥धर्मक्रियांकर्तुकामःपूर्वंस्नानंसमाचरेत्॥क्रियांगंतत्समुद्दिष्टंस्नानंवेदपरैर्द्वि
जैः॥८॥ ॥तथाच॥ ॥जप्तुकामःपवित्राणिअर्चिष्यन्देवतांपितॄन्॥स्नानंसमाचरेद्यस्मा
त्क्रियांगंतत्प्रकीर्तितं॥९॥मलापकर्षणंनामस्नानमभ्यंगपूर्वकं॥मलापकर्षणायैवप्रवृ ॥१५॥
त्तिस्तस्यनान्यथा॥१०॥सरित्सुदेवखातेषुतीर्थेषुचनदीषुच॥स्नानमेवक्रियायस्मात्तस्मा
त्पुण्यफलंस्मृतं॥११॥ ॥अथगौणस्नानं॥ ॥जाबालिः॥ ॥असामर्थ्याच्छरीरस्यदेशका

ब्दस्त्राक्षित ।।मंत्रस्नानादितःसप्तकेचिदिछंतिसूयेरे ।।१२।। ।।योगी।। ।।मांत्रंभौमंतथाग्नेयं
वायव्यंदिव्यमेवच ।।वारूणंमानसंचैवसप्तस्नानान्यनुक्रमात् ।।१३।।आपोहिष्ठादिभिर्मां
त्रंमृदालंभंचपार्थिवं ।।आग्नेयंभस्मनास्नानंवायव्यंरजसागवां ।।१४।।अद्भिःसातपवर्षा
भिःस्नानंतद्दिव्यमुच्यते ।।वारूणंचावगाहश्चमानसंविष्णुचिंतनं ।।१५।। ।।अवगाहनस्ना
नंमांत्रं।। ।।जाबालिः।। ।।अशीरस्कंनवेत्स्नानंस्नानात्रोक्तौतुकर्मिणां ।।आर्द्रेणवाससा
वापिमार्जनंकापिलंविदुः ।।१६।। ।।स्कंदपुराणात्।। ।।पुण्यकनखलेयत्रप्रयागेयत्रवसुं द
रे ।।तत्फलंसकलंद्रेविभूतिस्नानेविधीयते ।।१७।। ।।प्रजापतिः।। ।।शंनःआपस्त
द्रुपदाआपोहिष्ठाघमर्षणं ।।एतैश्चतुर्भिर्ऋग्मंत्रैर्मंत्रस्नानमुदाहृतं ।।१८।।विद्यात्स
रस्वतीप्राप्तंस्नानंसारस्वतंस्मृतं।। ।।गर्गः।। ।।क्रियतेवानवायत्तुत्राणस्वयंत्रणाया

ह्क॥
॥१६॥
२य

विना॥मलव्यपोहनफलंस्नानंयद्यपिकिंतुतत्॥२०॥सीस्तंस्नानंयथोद्दिष्टंनस्ना
नाक्रमेणतु॥कालौदृष्टादृसामर्थ्यात्सर्वंतुल्यफलंस्मृतं॥२१॥ ॥जाबालिः॥ ॥सत
तंप्रातरुत्थौदंतधावनपूर्वकं॥आचरेदुषसिस्नानंतर्पयेत्पितृदेवताः॥२२॥ ॥न
ह्रिष्ठः॥ ॥अत्यंतमलिनोकायोनवछिद्रसमन्वितः॥स्रवत्येवदिवारात्रौप्रातःस्ना
नविशोधनं॥२३॥अज्ञानाद्यद्दिवामोहाद्रात्रौयदुष्कृतंकृतं॥प्रातःस्नानेनतत्सर्वं
शोधयंतिद्विजातयः॥२४॥नाहंसाकेनवस्त्रेणस्नायात्कौपीनकाहते॥नान्यदीयेन
नार्द्रेणनस्यूत्यायचिलेनच॥२५॥ ॥मेधातिथिः॥ ॥एकेनवाससास्नानंद्वाभ्यामनि ॥१६॥
यमःस्मृतः॥बहुभिःप्रतिवेधःस्यात्स्नानेफलमतोमतः॥नजलंताडयेत्पद्भ्यांनजलेतु
मलंत्यजेत्॥मलंप्रक्षालयेत्तीरेततःस्नानंसमाचरेत्॥२६॥ ॥जाबालिः॥ ॥ध्य॥ ॥

स्रोतसोभिमुखोमज्जेद्यत्रापः प्रवहंत्यवै॥ स्थावरेषुचसर्वेषु आदित्याभिमुखस्तथा॥
॥२८॥ ॥वशीष्ठः॥ ॥प्रातःसंक्षेपतःस्नानंहोमार्थंतु तदिष्यते॥ मंत्रैस्तु विधिनिष्पा
द्यंमध्याह्नेतु सविस्तरं॥२९॥ ॥तत्रनद्यादिक्रमेण विवरणं॥ ॥स्मृत्यंतरं॥ ॥नि
षिच्यलीरंकुशापिंडुलानिपूर्वोत्तरायाणिमृदंन्यसेच्च॥ प्रक्षाल्यपादौसंमुखंचकंठे
यज्ञोपवीतंचजलंपिबेत्त्रिः॥३०॥ कराभ्यांधारयेद्दर्भौशिखाबंधविधिस्ततः॥ प्राणा
यामत्रयंकुर्यात्काम्यस्नानंयथाविधि॥३१॥ ॥तद्यथा॥ ॥अद्येत्यादिदेशकालौस्मृ
त्वाअशेषपापक्षयार्थंवासुदेवप्रीत्यर्थंप्रातस्नानमहंकरिष्ये॥ ॥मृत्तिकांतु
त्रिधाकृत्वाभागेनैकेनलेपयेत्॥ त्रिःकृत्वादक्षिणेहस्ते स्थानान्येतान्यनुक्रमात्॥३२॥

17

न्हिक॥

१७॥

त्वगात्मंसोहस्तष्ठमुदरंचसकुक्षिकं॥ततोवामकरेणैवनाभ्यूरूजंघयोर्द्वयोः॥३३॥द
क्षिणादिक्रमेणैवचरणौचत्रिभिस्त्रिभिः॥मस्तकंतीर्थयोगेनकरौचपरिमार्जयेत्॥
॥३४॥ ॥प्रचेताः॥ ॥धर्मविद्दक्षिणंहस्तंनाधःशौचेनिवेशयेत्॥तथैववामहस्तंच
नाभेरूर्ध्वंनियोजयेत्॥३५॥इतिलक्ष्मीस्नानंकृत्वासम्यग्वस्त्रंवित्रात्॥नमोना
रायणायेतिसप्तवारंजपन्व्रजेत्॥३६॥नाभिमात्रेजलेस्थित्वाकेशान्सध्याद्विधा
द्विजः॥निरुंध्यकर्णौनासांचत्रिःकृत्वोमज्जनंचरेत्॥३७॥द्विराचम्याभिषेकंतु ॥१७॥
कुर्याद्दशाक्षरेणतु॥अश्कृत्वाथज्ञापंगोःसूक्तेनावर्त्तयेदपः॥३८॥जुबकाय
तिमंत्रेणविदध्यादघमर्षणं॥जपेद्वादस्त्रावारंतुमहापापापनुत्तये॥३९॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्प॰ तुंबकायेति मंत्रैश्च शिरोह्यमुंडिस्नः ॥ गायत्रीवरुणोद्देवो अघमर्षणकर्मणि ॥ ९ ॥
अघमर्षणक्रियया धूतपापः समाहितः ॥ ततो निमज्ज्य वारांस्त्रीनूततस्तर्पण
माचरेत् ॥ ४१ ॥ ॥ दक्षः ॥ ॥ नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ॥ तर्पणं
तु त्रयेत्तत्र अंगत्वेनोपपद्यते ॥ ४२ ॥ ॥ व्याघ्रः ॥ ॥ स्नाने चैव तु सर्वत्र तर्पयेद्दे
वताः पितॄन् ॥ नित्ये काम्ये विशेषेण तत्स कुर्यात्प्रयत्नतः ॥ ४३ ॥ ॥ शातातपः ॥ ॥
तर्पणं तु ततः कुर्यात्प्रत्यहं स्नानको द्विजः ॥ देवेभ्यश्च मनुष्येभ्य पितृभ्यश्च यथा
क्रमं ॥ ४४ ॥ ॥ कात्यायनः ॥ ॥ छायां यथेच्छेच्छरदातपार्त्तः पयः पिपासुः क्षुधि
तोऽन्नमन्नं ॥ बालो जनित्रीं जननी च बालं योषित्पुमांसं पुरुषश्च योषां ॥ ४५ ॥ ९ ॥

18

तथासर्वाणिभूतानिस्थावराणिचराणिच॥ विप्रादुदकमिछंतिसर्वेमनुष्यद्विसः॥४६॥
पराशरः॥ ॥सव्येनचोपवीतेनदेवानांतर्पणंस्मृतं॥ पितॄणामपसव्येनमनुष्याणां
निवीतिना॥४७॥ देवपितृमनुष्यादीन्स्वशाखाविधिचोदितान्॥ एकैकांजलि
नासर्वान्प्रथमांतेनयाचयेत्॥४८॥ ॥योगी॥ ॥अनामिकायांधृतंहेमतर्जन्यां
रौप्यमेवच॥ कनिष्ठिकायांधृतंखड्गंतेनपूतोभवेद्विजः॥४९॥ ॥शातातपः॥ ॥ख
ड्गमौक्तिकहस्तेनकर्तव्यंपितृतर्पणं॥ मणिकांचनदर्भैर्वानशून्येनकदाचन॥५०॥
हस्तः॥ ॥कुंभस्थएवकुर्यात्तुतर्पणंप्रातरेवहि॥ बाहूपूर्णंतिलैःकृत्वानान्यथोक्तंम
नीषिभिः॥५१॥ ॥पराशरः॥ ॥शुक्लैस्तुतर्पयेद्देवान्मनुष्यान्शबलैस्तिलैः॥ पितॄ

संतर्पयेल्लक्ष्मैस्तर्पणे सर्वदा द्विजः ॥५२॥ ॥बौधायनः॥ ॥रविशुक्रत्रयोदश्यां सप्तम्यां निशि
संध्ययोः॥ तिलतर्पणसंयोगात्तज्जलं रूधिरायते ॥५३॥ ॥स्मृत्यंतरात्॥ ॥क्षयाहे पा
तसंक्रांतौ यसिते राशिगताभास्करे॥ नवारतिथिदोषास्ति कुर्यात्तु तिलतर्पणं॥ ॥५४॥ ॥का
त्यायनः॥ ॥मघापुगारोत्तरणपालीर्थे पर्वविशेषतः॥ तिलैस्तु तर्पणं दानं श्राद्धं कुर्या
त्प्रयत्नतः॥ ॥५५॥ ॥मरीचिः॥ ॥मुक्तहस्तेन दातव्यं नमुद्रां तत्र दर्शयेत्॥ तर्जन्यंगुष्ठयो
र्योगे मुद्रेयमभिधीयते ॥५६॥ ॥तिलानामप्यलाभे तु सौवर्णरजतान्वितं॥ तदभावे नि
षिंचेत्तु दर्भैर्मंत्रेण वा पुनः॥ ॥५७॥ अत एव द्विजैः कार्यं तर्पणं तिलसंयुतं॥ पितृणां तु
विशेषेण तद्विना निःफलं भवेत्॥ ॥५८॥ ॥तदुक्तं रामायणेपि॥ ॥पादशौचमनस्यंग

19

आह्निक ॥

॥ १९ ॥

तिलहीनं तु तर्पणं ॥ न सर्वेत्रिजडेष्वेतु न्यं पञ्चश्राद्धमदक्षिणं ॥ ५८ ॥ तिलसद्भावे पितृध्यानतर्पणा
दिविषयं ॥ अन्यथा मरीच्यादिवचनविरोधः ॥ एकहस्तेन तोयेन न कुर्मीसिस्त तर्पणं ॥ पि
तरो न प्रशंसंति न प्रशंसंति देवताः ॥ दि॰ ॥ ॥ व्याघ्रः ॥ ॥ उभाभ्यामपि पाणिभ्यामुदकं यः प्रय
छति ॥ समुद्रो नरकं याति कालसूत्रमवाङ्मुखः ॥ दि १ ॥ ॥ एतदन्यविषयं ॥ ॥ कार्ष्णाजिनिः ॥ ॥
विवाहे श्राद्धकाले च पाणिनैकेन दीयते ॥ तर्पणे तु न्नयेनैव विधिरेषः पुरातनः ॥ दि॰ ॥ यमः ॥
द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिं ॥ गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥ दि २ ॥ ॥ १९ ॥
उभाभ्यामपि पाणिभ्यां प्रागग्रेष्वथ कुशेः सुरान् ॥ प्राङ्मुखश्चोपवीती च देवतीर्थेन तर्पयेत् ॥ दि॰ ॥
दक्षः ॥ ॥ प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान् ॥ उदङ्मुखो मनुष्यांश्च पित्रादीन्द

क्षिणमुखः ॥ ६५ ॥ अथैस्तु तर्पयेद्देवान्मनुष्यांश्चैव मध्यतः ॥ पितृंश्चैव तु मूलाग्रैः कुशा
नां तु यथाक्रमं ॥ ६६ ॥ ॥ व्यासः ॥ ॥ एकैकमंजलिं देवान्द्वौ द्वौ तु सनकादयः ॥ अर्हंति पित
रस्त्रींस्त्रीन्स्त्रियस्त्वेकैकमंजलिं ॥ ६७ ॥ ॥ शालंकायनः ॥ ॥ मातृमुख्याश्च यास्तिस्रस्तासां द
द्याज्जलांजलीन् ॥ त्रींस्त्रीनथ च यास्त्वन्यास्तासामेकैकमंजलिं ॥ ६८ ॥ ऋषिरत्र मधुच्छंदो
गायत्री चैव देवता ॥ विश्वेदेवास्तदूत्सषक्ता आवाहने नियुज्यते ॥ ६९ ॥ त्रिष्टुप्छंदस्तु होराषिर्वि
श्वेदेवाश्च देवता ॥ विश्वेदेवाः शृणुतेतिमंत्रा आवाहने नियुज्यते ॥ ७० ॥ ॥ योगी ॥ ॥ मोदश्चैव
प्रमोदश्च सुमुखो दुर्मुखस्तथा ॥ अविघ्नो विघ्नकर्त्ता च इत्येते षड्विनायकाः ॥ ७१ ॥ ॥ विना
यकतर्पणं तु माध्यंदिनानामेव नान्येषां ॥ ॥ योगी ॥ ॥ ब्रह्माणं तर्पयेत्पूर्वं विष्णुं रुद्रं

(२०)

न्हिक॥ प्रजापतिं॥ देवान्छंदांसि वेदांश्च सैंऋषींश्चैव सनातनान्॥ ७२॥ आचार्यांश्चैव
२०॥ गंधर्वान्आचार्यानितरांस्तथा॥ संवत्सरंच सावयवं देव्यश्चाप्सरसस्तथा॥ ७३॥
तपा देवानुगान्नागान्सागरान्पर्वतानपि॥ सरितोथ मनुष्यांश्च यक्षान्रक्षांसि
चैव हि॥ ७४॥ सुपर्णंपिशा[illegible]चांश्च भूतान्यपि पशूंस्तथा॥ वनस्पतीनोषधी
श्च भूतऔग्रामंचतुर्विधं॥ ७५॥ मरीचिमत्र्यंगिरसौ पुलस्त्यं पुलहं क्रतुं॥ प्रचे
तसं वसीष्ठंच भृगुं नारदमेव च॥ ७६॥ गौतमोथ भरद्वाजो विश्वामित्रोथ कश्य
पः॥ जमदग्निर्वसीष्ठश्चमात्रिर्दक्षस्तथैव च॥ ७७॥ स्वारोचिष प्रचेताश्चउत्ता ॥२०॥
मसोरैवतस्तथा॥ चाक्षुषश्च महातेजा वैवस्वतस्तु नएव च॥ ७८॥ क्रवोघ

रश्चसोमश्चआपश्चैवानलोनिलः॥ प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्त्तिताः॥
॥७९॥ मनुष्याणांतथाकुर्यात्तर्पणंकंठसर्ज्जने॥ प्राजापत्येनतीर्थेनतर्पयेद्ब्रह्मणः
सुतान्॥८०॥ ॥गोभिलः॥ ॥दर्भाःकृष्णाजिनंमंत्रागावोग्निर्ब्राह्मणास्तिलाः॥ने
ननिर्माल्यतांयांतियोऽज्यमानाःपुनःपुनः॥८१॥ अतोदेवतर्पणोपयुक्तैरपि
दर्भैर्मनुष्यपितृतर्पणकरणेनप्रत्यवायः॥ ॥कार्ष्णाजिनिः॥ ॥सनकश्चस
नंदनस्तृतीयश्चसनातनः॥ कपिलश्चासुरिश्चैववोढुःपंचशिखस्तथा॥८२॥
एतेब्रह्मसुताःसप्तमानवाःपरिकीर्त्तिताः॥ तर्पयेदंजलिद्वाभ्यांप्रत्येकंतानतं
द्रितः॥८४॥ ॥पैठीनसिः॥ ॥अपसव्यंततःकृत्वास्थित्वाचपितृदिङ्मुखः॥

कृक॥

॥२१॥

पित्राद्यींश्च पितृव्यादीन् पितृतीर्थेन तर्पयेत् ॥८५॥ पितरोदेयतानुष्टुछंदयमश्च प्रजापतिः॥
सरस्वत्यश्विनौ चोत्रांल स्त्वेस्यावाहये सितृन् ॥८६॥ पितरोदेयतानुष्टुप्छंदः प्रजाप
तिर्ऋषिः॥ आयंतु न इति प्रोक्तं पित्रावाहनकर्मणि॥८७॥ इति मंत्रद्वयेनैव आवाह्याः
पितरः सदा॥ तर्पयेत्तान्त्रांस्पार्थ धर्मं परममास्थितः॥८८॥ ॥योगी॥ ॥कव्यवा
उनळःसोमोयमश्चैवार्यमा तथा॥ अग्निष्वात्ताबर्हिषदः आज्यपासोमपास्तथा॥८९॥
यमाय धर्मराजाय मृत्यवे चांतकाय च॥ वैवस्वताय कालाय सर्वभूतक्षयाय च॥९०॥ औ
दुंबराय दध्नाय नीलाय परमेष्ठिने॥ वृकोदराय चित्राय चित्रगुप्ताय वै नमः॥९१॥ ॥पि
गी॥ ॥यदि स्यात् जीवपितृको यस्पोदधात् कांजलीन्॥ येभ्य एव पिता दद्यात्तेभ्योदद्यात्स्व ॥२१॥

पंस्तुतः॥९२॥ सन्यस्तपतित पितृविषयमेतत्॥ ॥तथाचपराशरः॥ ॥ [illegible] दह्योतीर्थेचसन्यस्ते
लातेचपतितेसति॥ येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतः॥९३॥ ॥कार्ष्णाजिनिः॥ ॥ना
भिमात्रेजलेस्थित्वाचिंतयेदूर्ध्वमानसः॥ आगच्छंतुमेपितरोगृह्णंत्वितिजलांजलिम्॥९४॥ पि
तृणांसंचरस्थानामंत्रस्थोदक्षिणामुखः॥ त्रीस्त्रीजलांजलिंदद्यादुच्चैरुच्चतरंबुधः॥९५॥
॥सुमंतुः॥ ॥आकाशेतुक्षिपेद्वारिजलस्थोदक्षिणामुखः॥ पितृणांस्थानमाकाशंदक्षिणा
दिक्तथैवच॥९६॥ ॥योगी॥ ॥मंत्रैस्तुदेयमुदकंपितृणांप्रीतिवर्द्धनैः॥ उदीरतामंगिरसआ
यंतिसुजमिवच॥९७॥ पितृभ्यइतियेचेहमधुवाताइतित्रिरुचं॥ पितृन्ध्यायेत्प्रसिंचेतज
पन्मंत्रान्यथाक्रमं॥९८॥ तृप्यध्वमितिचत्रिस्त्रिःपुरुषंप्रतितर्पयेत्॥ नमोवइतिलिङ्गध्यावेत
तोमातामहानपि॥९९॥ उदीरतामंगिरसआयंतुनइतित्र्यृचां॥ पितरोदेवतास्त्रिष्टुप्छ

२२

थाद्दे

षिःस्वयंभुप्रजापतिः॥१००॥ऊर्जंवहंतीप्राजापत्यार्षंतद्दैवताविराट्॥पितृभ्यइतिषड्चेहपितरोदेवताद्य
यो:॥१॥ऋषिःप्रजापतिःपूर्वाविराट्त्रिष्टुप्तथोत्तरा:॥विश्वेदेवादेवताश्चगायत्रीछंदउच्यते॥२॥
ऋषिर्गौतमउद्दिष्टोमधुवाताइतित्र्यृचां॥नमोवःपितृदैवत्यंप्राजापत्यार्षमेवच॥३॥गायत्रीचभवे
छंदोविनियोगस्तुतर्पणे॥इत्येकाश्चद्वानश्चमंत्रैरेभिस्तुतर्पयेत्॥४॥पितृतर्पणेक्रममाह॥म
स्यव्रतः॥ ॥पितृभ्यःप्रत्यहंदद्यान्मातृभ्यस्तदनंतरं॥ततोमातामहानांचपितृव्यादींस्ततस्तु
नः॥५॥ ॥सत्यतपाः॥ ॥पितृणांतर्पणंपूर्वंमातृणांतदनंतरं॥ततोमातामहानांचपितृव्यस्यसु
तस्यच॥६॥ ॥मरीचिः॥ ॥पित्रादित्रयपत्नीनांपृथक्देयंततोजलं॥ततोमातामहानांचक्रम ॥२२॥
एषहितर्पणे॥७॥ ॥व्यासः॥ ॥पित्रेपितामहाभ्यांचमात्रेदद्यात्ततोजलं॥पितामह्योस्ततोदद्या
न्मातामहकुलेततः॥८॥ ॥इत्याद्यनेकवचनपर्यालोचनयापित्राद्यनंतरमेवमातृतर्पणं॥ततो

मातामहतर्पणं ॥ स्मृत्यंतरे प्रत्यवायश्रवणात् ॥ ॥ स्मृत्यंतरात् ॥ ॥ अनंतर्मातामहान्हेत्सामातृ
णां यः प्रच्छति ॥ तर्पणं पिंडदानं च नरकं स तु गच्छति ॥ ९ ॥ ॥ शंखः ॥ ॥ पूर्वं स्ववंशजातानां कुर्यादुद
कतर्पणं ॥ सुहृत्संबंधिबंधूनां ततः कुर्याच्च तर्पणं ॥ १० ॥ ॥ योगी ॥ ॥ मातुलं मातृस्वसारं मातु
लानीं पितृस्वसारं ॥ दुहितरं स्वसारं च शिष्यर्त्विक्कुलानि बांधवाः ॥ ११ ॥ नामभिस्तु स्वधाकारैस्त
र्पयेदनुपूर्वशः ॥ १२ ॥ ॥ बौधायनः ॥ ॥ शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य च ॥ गुप्तांतं चै
व वैश्यस्य दासांतं शूद्रजन्मनः ॥ १३ ॥ ॥ योगी ॥ ॥ सवर्णेभ्यो जलं देयं नासवर्णेभ्य एव च ॥ गोत्र
नामस्वधाकारैस्तर्पयेदनुपूर्वशः ॥ १४ ॥ ॥ कार्ष्णाजिनिः ॥ ॥ देवतानां पितॄणां तु जले दद्याज्जलां
जलिं ॥ असंस्कृतप्रमीतानां स्थले दद्याज्जलांजलिं ॥ १५ ॥ ॥ मत्स्यपुराणे ॥ ॥ येऽबांधवा बांधवा ये
यान्यजन्मनि बांधवाः ॥ ते तृप्तिमखिलां यांतु यश्चास्मत्तोऽभिवांछति ॥ १६ ॥ नरकेषु समस्तेषु या

ह्निक॥

॥२३॥

तनाश्चसंस्थिताः॥तेषामाप्यायनायैतत्दीयतेसलिलंमया॥१७॥ ॥तथाचवस्त्रनिपी
डनमंत्रः॥ ॥येचास्माकंकुलेजाताअपुत्रागोत्रिणोमृताः॥तेगृह्णंतुमयादत्तंवस्त्रनिष्पीड
नोदकं॥१८॥वस्त्रशब्देनवस्त्रस्यैकदेशोभिधीयते॥ ॥वशिष्ठः॥ ॥नास्तिक्यभावाद्यो
ऽस्वस्थोनतर्पयतिवैपितॄन्॥पिबंतिदेहनिस्रावंपितरोस्यजलार्थिनः॥१९॥ ॥दक्षः॥ ॥
स्नात्वाचामेत्सदाविप्रोपादौकृत्वोन्नयस्थितौ॥उन्नयोरप्यसौशुद्धःपादौकृत्वार्द्रवाससा॥
॥२०॥ ॥स्मृत्यंतरात्॥ ॥स्नानमाचमनंदानंजपंहोमंप्रतिग्रहं॥जोडजंच[illegible]वि
नाद्वैर्बहिर्जानुचनिःफलं॥२१॥विकरेपिंडदानेचजोडनेनतर्पणेतथा॥कृत्वाप्याचम
नंप्रोक्तंदर्भेस्त्यागोविधीयते॥२२॥ ॥शौनकः॥ ॥पवित्रस्यविनाशौचमाचांतेपिक ॥२३॥
दाचन॥पितृणांतर्पणेस्याऽस्पंजोडनेनतुविरोपनः॥२३॥ ॥व्यासः॥ ॥यःस्नानवस्त्रेण

मुखंविमृज्यतेस्नातातुपःस्यादतिदंतधावनं॥अन्योन्यपृष्ठेननचष्ठोपलिप्यतेइतीहल्लसा
प्रजहातिसः श्रियं॥२५॥ ॥व्यासः॥ ॥नद्यामस्तमितेस्नानंवर्जनीयंसदाबुधैः॥नद्यां
स्नात्वानदींचान्यांनप्रशंसेतधर्मवित्॥२६॥ ॥योगी॥ ॥हर्रीस्नानंनकुर्वीतमातापित्रो
स्तुजीवतोः॥कुर्यात्तीर्थेक्षयाहेचअनुज्ञायांतयोरपि॥२७॥पुत्रःकुर्वन्नियाचष्टेपुत्रारु
कृतजीवितं॥नक्रोनजस्पयोर्मध्येसर्वानद्योरजस्वलाः॥तासुस्नानंनकुर्वीतवर्जयित्वास
मुद्रगाः॥२८॥गंगाचयमुनाचैवप्लक्षजातासरस्वती॥रजसानाभिभूयंतेयेचान्येनद
संज्ञकाः॥२९॥ ॥योगी॥ ॥कर्कटादौरजोदुष्टागोमतीवासरत्रयं॥चंद्रभागासतीसिंधुः
त्रारयुर्नर्मदातथा॥३०॥उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच॥चंद्रसूर्यग्रहेचैव

न्हिकृ॥

२४॥

रजोरोषोनविद्यते ॥२१॥ धनुःसहस्राण्यष्टौतुगतिर्यासांनविद्यते ॥ – – – – शब्दमहाग
तीस्तेपरिकीर्त्तिताः ॥२२॥ ॥धनुश्चतुःकरः॥ ॥प्रसावन्तीस्विकेस्नानंवर्जनीयंद्विजातिभिः॥ल
पारडकलीयेषुदस्याहस्तेनवर्जयेत् ॥२३॥ ॥योगी॥ ॥त्रिरात्रफलदानद्योपाःकाश्चिदसमु
द्रगाः॥समुद्रगास्तुपक्षस्यमासस्यसरितांपतिः॥२४॥ ॥मरीचिः॥ ॥भूमिस्थमुद्धृतंवापि
शीतमुष्णमथापिवा॥गंगापयःपुनात्याशुपापमामरणांतिकं॥२५॥त्रिभिःसारस्वतंतो
यंसप्ताहेनतुयामुनं॥सद्यःपुनातिगांगेयंदर्शनादेवनार्मदं॥२६॥ ॥अथगंगादिनदीस्ना
नमंत्रः॥ब्रह्मपुराणे॥ ॥त्र्यंबकस्यजटोद्भूतेगंगेनमस्यापनाशिनी॥सप्तधासागरंयासि ॥२४॥
गोदावरिनमोस्तुते॥२७॥इहजन्मनिपूर्वेस्मिन्यन्मयादुष्कृतंकृतं॥तत्सर्वंनश्यतान्तूर्णं

गोदावरिनमोस्तुते॥३९॥ ॥गोदावरीनमस्कारः॥ ॥पुराणोक्त॥ ॥विष्णुपादाब्जसंभूतेगंगेत्रिप
थगामिनी॥धर्मद्रवीतिविख्यातापापंमेहरजान्हवी॥४०॥श्रद्धयाधर्मसंपन्नेश्रीमाताराज
सेश्वरि॥अं[illegible]लेनांबुनादेविभागिरथिपुनीहिमां॥४१॥ ॥इतिस्नानमंत्रः॥ ॥करतोयस
दानीरेसरिच्छ्रेष्ठेतिविश्रुते॥आप्लावयासिपोंड्राणांपापंहरकरोद्भवे॥४२॥ ॥करतोयास्ना
नमंत्रः॥ ॥गाधीराजसुतेदेविविश्वामित्रमुनेःस्वसा॥रूचीकस्यार्थसत्यायेपापंमेहरकौ
शिकी॥४३॥ ॥कौशिकीमंत्रः॥ ॥अथगंगासागरस्नानमंत्रः॥ ॥त्वंदेवसरितांनाथत्वं
देविसरितांवरे॥उभयोःसंगमेस्नात्वामुंचामिदुरितानिवै॥४४॥ ॥अथलौहित्यसमुद्र
स्नानमंत्रः॥ ॥ब्रह्मपुत्रमहाभागसंततेःकुलवर्धन॥अमोघगर्भसंभूतपापंलौहितमे

॥२५॥

हर॥४५॥ ॥सागरस्नानमंत्रः॥ ॥अग्निश्चतेजोमृडयाचदेहोरेतोधाविष्णोरमृतस्यनाभिः॥एतद्ब्रुवन्पांडवस
त्यवाक्यंततोवगाहेतपतिंनदीनां॥४६॥ आजन्मशतसाहस्रंयत्पापंकुरुतेक्वचित्॥मुच्यतेसर्वपापेभ्यो
स्नात्वैवंलवणांभसि॥४७॥ ॥स्नानमंत्रः॥मत्स्यपुराणे॥ ॥आद्येनमःपुण्यजलेनमःसागरगामीनि॥न
र्मदेपापनिर्मोचिनमोदेविवरानने॥४८॥नमोस्तुतेस्वंगणसिद्धसेवितेनमोस्तुतेशंकरदेहनिःसृते॥
नमोस्तुतेधर्मभृतांवराननेनमोस्तुतेपुण्यपवित्रपावने॥४९॥ ॥इतिनर्मदास्नानमंत्रः॥आबाल्किः॥
अश्वत्थसागरौसेव्यौनस्पृष्टव्यौकदाचन॥अश्वत्थंमंदवारेणसागरंपर्वणिस्पृशेत्॥५०॥चैत्रेकृष्ण
चतुर्दश्यांयःस्नायाच्छिवसन्निधौ॥नसप्रेतत्वमायातिगंगायांचविशेषतः॥५१॥शिवालयसमीपस्थं ॥२५॥
तोयंपुण्यतमंस्मृतं॥शिवगंगेतितत्प्रोक्तंतत्रस्नानंमहाफलं॥५२॥ ॥योगी॥ ॥नद्यांस्नानानिपुण्यानि

तडागे मध्यमानि च ॥ वापीकूपतडघन्यानि गृहे प्रस्रवणानि च ॥५३॥ ॥ इति नदीस्नानविवरणं ॥ ॥ वा
पीकूपतडागेषु देवखातेषु मज्जतां ॥ आदित्याग्निमुखः कुर्याद्विधिं स्नानस्य पूर्ववत् ॥५४॥ इत्याद्येषु क्र
मः प्रोक्तो विशेषं कृत्रिमे जळे ॥ कृत्रिमं जळमासाद्य विधिनानेन कारयेत् ॥५५॥ ॥ मनुः ॥ ॥ अलाभे दे
वखातानां सरितां सरसां तथा ॥ उद्धृत्य च चतुः पिंडान्पारक्ये स्नानमाचरेत् ॥५६॥ ॥ पारक्यमिति
अनुत्सृष्टजळं ॥ मत्स्यपुराणे ॥ ॥ दर्भपाणिस्तु विधिना आचांतः प्रयतः शुचिः ॥ तीर्थं प्रकल्पयेद्विद्वा
न्मूळमंत्रेण मंत्रवित् ॥५७॥ ॐ नमो नारायणायेति मूळमंत्र उदाहृतः ॥ चतुर्हस्तं समायुक्तं चतुरस्रं
समंततः ॥५८॥ प्रकल्प्यावाहनं कुर्यादेभिर्मंत्रैर्विचक्षणः ॥ विष्णोः पादप्रसूतासि वैष्णवी विष्णुदेव
ता ॥ त्राहि मां तेनसस्तस्मादाजन्ममरणांतिकात् ॥५९॥ नंदिनीत्येव ते नाम नळिनी देवलेषु च ॥ द
क्षा साध्वी च विहगा विश्वकाया शिवामृता ॥ विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी ॥६०॥ खेचरी
जान्हवी चैव शांता शांतिप्रदायिनी ॥ एतानि पुण्यनामानि स्नानकाले प्रकीर्त्तयेत् ॥ भवेत्सांनिहिता

28

स्क॥

२६॥

तत्र गंगा त्रिपथका गामीनी॥६२॥ ॥जाबालिः॥ ॥गंगायां च कुरुक्षेत्रे प्रयागे दधिसंगमे॥ तीर्थान्येतानि
संस्मृत्य ततो मज्जेज्जलाश्रये॥६४॥ इति वापीतडागेषु कुंडेषु स्नानमाचरेत्॥ क्रमप्राप्तं गृहे स्नानं
विधिराख्यायतेऽस्मतः॥६५॥ ॥नित्यं नैमित्तिकं चैव क्रियांगं मलकर्षणं॥ अन्याभावे तु कर्तव्यमु
ष्णोदकपरोक्षकैः॥६६॥ ॥चतुर्विंशतिमतात्॥ ॥आपः स्वभावतो मेध्याः किं पुनर्वह्निसंयुताः॥ अ
तः संतः प्रशंसंति स्नानमुष्णेन वारिणा॥६७॥ ॥यमः॥ ॥आपो पयः स्वतः पूतास्तासां यद्वह्निवि
शोधनं॥ अतः सर्वेषु कालेषु उष्णांभः पावनं स्मृतं॥६८॥ पादौ प्रक्षालयेत्पूर्वं मुखं यज्ञोपवीतकं॥
द्विराचम्य कराभ्यां तु दर्भान्धृत्वा शिखां स्पृशेत्॥६९॥ प्राणायामं ततः कृत्वा कालज्ञानं यथोदितं॥
पूर्वोत्तरामुखो भूत्वा इत्थं तु स्नानमाचरेत्॥७०॥ इषेत्वादि स्वं ब्रह्मांते विवस्वान्‌ऋषिसत्तमः॥ स्वः ॥२६॥
प्रजापति सर्वच्छंदांसि च यजूंषि च॥७१॥ वायव्यानि च सर्वाणि नियोगः सर्वकर्मसु॥ इत्याकासल
निर्मंत्रैरक्षि पिबेद्द्विजोत्तमः॥७२॥ इमं मे आपो हिष्ठा च यो वस्तस्मा अरं गमतः॥ इदमापश्चउपद

त्राचमणन्निर्विशोधयेत् ॥७४॥ शीतोदकेतु दत्तैश्च पश्चादुष्णोदकं क्षिपेत् ॥७५॥ ॥व्यासः॥ ॥ शीलास्य
स्तु निषिद्धंच्योस्नं मंत्रसंज्ञारयोगतः ॥ गृहेपि शास्यते स्नानं तद्विनालापनं बहिः ॥७६॥ गंगास्मृत्वा
गृहे स्नायात् न पुनः श्रोत्रवंदनं ॥ नत्यजेत्केरदत्तैश्च नार्द्रवासाश्चतर्पयेत् ॥७७॥ ॥हारितः॥ ॥
आर्द्रवासास्तु वै कुर्यात्तर्पणाचमनं जपं ॥ शुष्कवासाजलेयस्तु सोमेध्यं पाययेत्पितृन् ॥७७॥
॥मनुः॥ ॥मलेजन्मनिसंक्रांतौ श्राद्धे जन्मदिने तथा ॥ अपस्पर्शाचमेचैव नस्नायादुष्णवारिणा ॥
॥७८॥ ॥इति गृहस्नानविधिः ॥ अथ मलापकर्षणं ॥ ॥योगी॥ ॥ मलापकर्षणं नाम स्नानमभ्यं
गपूर्वकं ॥ मलापकर्षणार्थं वै प्रवृत्तिस्तस्य नान्यथा ॥७९॥ द्वितीयां दशमीं दर्शं रिक्तां षष्ठीं त्रयो
दशीं ॥ पर्वाष्टम्यां रवौ नैमे तैलाभ्यंगं नरस्त्यजेत् ॥८०॥ आदित्यादिषु वारेषु तापः कांतिर्मृति
धनं ॥ दारिद्र्यं दुर्भगत्वं च कामाप्तिः स्नानतः क्रमात् ॥८१॥ षष्ठ्यष्टमीपंचदशीपक्षद्वयचतुर्द
शी ॥ तत्र संनिहितं पापं तैले मांसे क्षुरे भगे ॥८२॥ नस्पोत्क्षंलसक्ष्मत्ररमश्रारोरुहनिकृंतने ॥

स्मृ॥

॥२७॥

॥८३॥

नस्नायीतनरःश्रोषेतैलाभ्यंगंविधीयते॥ ॥बृहस्पतिः॥ ॥संक्रांतौरविवारेचषष्ठ्यांभौमदिनेतथा॥द्र्यां
तरयुतंतैलंनदुष्यतिकदाचन॥८४॥ ॥प्रचेताः॥ ॥सार्षपंगंधतैलंचयत्तैलंपुष्पवासितं॥अन्यद्र
व्ययुतंतैलंनदुष्यतिकदाचन॥८५॥ ॥पुराणांतरात्॥ ॥श्रावण्यांवलिराज्येचतथासंवत्सरदर्शने॥
तैलाभ्यंगोनदुष्येतसंक्रांतिग्रहणादिते॥८६॥ ॥व्यासः॥ ॥श्रीकामःसर्वदास्नानंकुर्यादामलके
द्विजः॥लुप्यत्यामलकेविष्णुरेकादश्यांविशेषतः॥८७॥नवम्यांदर्शेसप्तम्योःसंक्रांतौरविवासरे॥
चंद्रसूर्योपरागेचस्नानमामलकैस्त्यजेत्॥८८॥सर्वदातुतिलैःस्नात्वापुण्यंप्राप्नोअब्रवीन्मुनिः॥न
पासप्तम्यमावास्यांसंक्रांतिग्रहणादिषु॥८९॥धनपुत्रकलत्रार्थीतिलपिष्टंतुसंत्यजेत्॥९०॥ ॥का
लनिर्णयात्॥योगी॥ ॥नस्नायादुत्सवेतीतेमांगल्यंविनिवर्त्यच॥अनुव्रज्यसुहृद्बंधूनर्चयित्वेष्टदेव
तां॥९१॥धात्रीफलैरमावास्यांसप्तमीनवमीषुच॥नस्नायात्तस्यहीयेततेजआयुर्धनंसुताः॥९२॥ ॥२७॥
द्वादश्यांकृष्णपक्षस्यनस्नातव्यंकदाच॥सुतसंतानमिच्छद्भिःकल्याणपरमैरपि॥९३॥ ॥इतिमलापकर्षणं॥ ॥

= नचनिर्धूनये =

॥मार्कंडेयः॥ ॥अथ मज्ज्यान्मे च स्नातो गात्राण्यंबरपाणिभिः॥ न च निर्धूनयेत्केशान्वासश्चैव न नि-
र्धुनेत्॥९४॥ ॥व्यासः॥ ॥न चानुलिंपेदंगानि स्नात्वा वासो निधाय च॥ आर्द्र एव तु वासांसि स्नात्वा
सेवेत मानवः॥९५॥ तिस्रः कोट्योर्धकोटी च यावद्रोमाणि मानुषे॥ स्रवंति नि[illegible]तीर्थानि तस्मान्न परि-
मार्जयेत्॥९६॥ अपि च देवाः पिबंति शिरसो मुखतः पितरस्तथा॥ राक्षसोपि च गंधर्वा अधस्ताल्ल-
र्वजं तथा॥९७॥ अतोंगानि च केशांश्च हस्तेनैनैव माडयेत्॥ यस्त्वैणेव विशेषेण न केशांश्च प्रमार्ज-
येत्॥९८॥ स्नातो मौनं कृत्वार्द्रवासांसि तु विण्मुत्रं कुरुते यदि॥ प्राणायामत्रयं कृत्वा पुनः स्नानेन शुध्य-
ति॥१९९॥ ॥योगी॥ ॥उष्पस्तुषसि यत्स्नानं चंद्रसूर्यग्रहे तथा॥ प्राजापत्येन तत्तुल्यं महापात-
कनाशनं॥२००॥ प्रातः स्नायी भवेन्नित्यं मध्यस्नायी भवेत्सदा॥ सप्तजन्मकृतं पापं त्रिभिर्वर्षैर्व्य-
पोहति॥१॥ त्रयाणामपि देवानामुत्रयोः संगमो भवेत्॥ मध्यमायां तु वेलायां सर्वदेवसमाग-
मः॥२॥ पुण्यं संध्यायतः स्नानं मंत्रेण प्लवनेन वा[illegible]॥ तस्मात्तामुन्नवेत्स्नानं सर्वपापात्प्रमुच्यते॥३॥

ह्निक॥

॥२८॥

संध्यात्रयंचकर्त्तव्यंद्विजेनात्मविदासदा॥उभेसंध्येतुकर्त्तव्येअन्यैश्चैवगृहाश्रमे॥४॥॥देवीपु
राणात्॥॥स्नानस्यकायिकंपापंतत्क्षणादेवनश्यति॥लक्ष्मीवृद्धिमवाप्नोतिस्वास्थ्यंतिष्ठति
समुखाः॥५॥अगम्यागमनात्स्तेयात्पापाच्चैवप्रतिग्रहात्॥रहस्याचरितात्पापान्मुच्यतेस्ना
नमाचरन्॥६॥॥इतिनृहनागदेवविरचितेआचारदीपेप्रातःस्नानविधिः॥॥अथव
स्त्रपरिधानविधिः॥॥योगि॥॥स्नात्वैवंवाससिधौतेअच्छिन्नेपरिधायच॥प्रक्षाल्योरू
मृदाऽद्भिश्चहस्तौप्रक्षाळयेत्ततः॥१॥॥ब्रह्मा॥॥इषद्धौतंनवंश्वेतंसदशांयन्नधारितं॥
अहतंतद्विजानीयात्सर्वकर्मसुपावनं॥२॥इषद्धौतमरक्तादिधौतमित्यर्थः॥योगी॥॥
बलाद्दतेनार्द्रवासानेकवासास्तुवैजपेत्॥नजीर्णेननीलेननपरिक्लिष्टेनवाजपेत्॥३॥ ॥२८॥
कषायंकृष्णरक्तंचमलिनंकेशदूषितं॥छिन्नाग्रंचोपवस्त्रंचकुत्सितंधर्मतोविदुः॥४॥

विष्णुपुराणात्॥ ॥होमदेवार्चनाद्यासु क्रियासु स्नानभोजने॥ नैकवस्त्रः प्रवर्त्तेत द्विजो वाऽप
तेजपेत्॥५॥ ॥गालवः॥ ॥सव्यादंसात्परिभ्रष्टं नाभ्यां हि वाप्यवस्थितं॥ एकवस्त्रं तु तं वि
याद्दैवे पित्र्ये च वर्जयेत्॥६॥ ॥योगी॥ ॥अभावे धौतवस्त्रस्य पट्टसूत्राजिनेन तथा॥ कुतपं यो
गपट्टं वा वासो यद्वा नवं भवेत्॥७॥ उत्तरीयं न तद्विंद्यात्परिछिन्नस्य वाससः॥८॥ ॥पारस्करः॥

अर्धेनैव विभागेन प्रकुर्याद्दुत्तरीयकं॥ तथा उत्तरीयाभावे कुले धौतवस्त्रस्यार्धविभागेनोत्तरी
यं कुर्यात्॥९॥ परिनववस्त्रपरिधानसमये तस्यार्धविभागस्य मंत्रवदुत्तरीयं कृतं नान्यथा॥
पारस्करसूत्रे एकं चेत्सर्वस्योत्तरवर्गेण प्रच्छादयेदिति॥ ॥जातुकर्ण्यः॥ ॥अभावे तु द्वितीयं तु व
स्त्रचीरं तदा भवेत्॥ घंगुलं व्यंगुलं वापि चतुरंगुलमेव च॥१०॥ एकवासाऽपयस्त्यपट्टा
भिद्रुहोति च॥ तत्सर्वमसुरेंद्राणां ब्रह्मा भागमकल्पयेत्॥११॥ तस्माद्वस्त्राहृतं कुर्यात्तेन तस्मा
दुत्तरीयकं॥ नान्यथा तु क्रियाः कुर्यादेकेनैव तु वाससा॥१२॥ नोत्तरीयमधः कुर्यान्नोपर्य

29

हक॥

।न्हु९

धस्त्रंतथा॥ नांतर्वासोविनावस्त्रंवसेत्तुवसनंबुधः॥१३॥ नग्नस्यान्मलवद्वासानग्नःकोपीन
केवलः॥ अकच्छोनुत्तरीयस्तुद्विकच्छोवस्त्रएवच॥१४॥ नग्नःस्यूतपटःखंडवस्त्रश्चार्धपटस्त
था॥ श्रौतस्मार्त्ततथाकर्मननग्नश्चिंतयेद्दिशि॥१५॥ एककच्छोद्विकच्छस्तुमुक्तकच्छस्तथैवच॥
एकवासाअवासाश्चनग्नःपंचविधःस्मृतः॥१६॥ पूर्वंकच्छेदक्षभागेप्यानाभौमध्यंतुवास
सा॥ सव्यांनिव्यांद्वितीयस्तुत्रिकच्छस्तुतदाभवेत्॥१७॥ परिधानाद्बहिःकच्छानिबद्धाह्यासु
रीभवेत्॥ धर्मकर्मणिविद्वद्भिःवर्ज्जनीयाप्रयत्नतः॥१८॥ ॥शातातपः॥ ॥प्रागग्रमुदगग्रंवा
धौतंवासःप्रसारयेत्॥ पश्चिमाग्रेदक्षिणाग्रेपुनःप्रक्षालनंभवेत्॥१९॥ परिधाय
नवंवासउत्तरीयंचमंत्रतः॥ द्विराचमेद्द्विजोधौतंवासोपिपरिधायच॥२०॥ अपूर्वग्रहणेमं
त्रौपठितव्यौद्विजन्मना॥ परिधास्येयशोधास्येअथोत्तरीयंयशसामेति॥२१॥ ॥इति
वस्त्रपरिधानविधिः॥ ॥अथपवित्रकविधिः॥ ॥ ॥स्मृत्यंतरात्॥ ॥पूर्वेपाणिःप्रकुर्वीतपव

॥न्हु९॥

मध्येतु प्रदीपवत् ॥ श्रीकामः शांतिकामश्च श्रेष्ठं तिलकमाचरेत् ॥१॥ नासामूलं समारभ्य यंत्रापत्र
निजं शुभं ॥ वश्यकामो द्विज कुर्यात् तिलकं चंदनादिना ॥२॥ न पादुकस्थो नादर्शे नजले नावलोक्य
यन् ॥ न प्राहतविरः कुर्यात् तिलकं धर्मसाधनं ॥३॥ अंगुष्ठः पुष्टिदः प्रोक्तो यशदा मध्यमा
तथा ॥ अनामिकाश्रियं दद्यान्मुक्तिं च द्याद्देशिनि ॥४॥ ॥विष्णुः॥ ॥ललाटे केशवं विंद्यान्ना
रायणमथोदरे ॥ हृदये माधवं विंद्याद्गोविंदं कंठकूपके ॥५॥ विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधु
सूदनं ॥ त्रिविक्रमं कर्णमूले वामकुक्षौ तु वामनं ॥६॥ श्रीधरं बह्ररौ केशं वामयाबीकुकर्णयोः ॥
पद्मनाभं पृष्ठदेशे ककुद्दामोदरं न्यसेत् ॥७॥ वासुदेवं स्मरेन्मूर्ध्नि तिलकं कारयेदिति ॥ एवं यो
विधिना कुर्याद्रक्षणा पात्मनः सदा ॥८॥ ॥सत्यव्रतः॥ ॥गोमलीलिरसं मूलांगो पिवापी सतु
कंवा ॥ मृदं मूर्ध्नि वहेल्लनाले: सर्वपापैः प्रमुच्यते ॥९॥ ऊर्ध्वपुंड्रं कृतं सोमं ललाटे यस्य दृश्यते ॥
सोऽशुद्धोपि हि शुद्धात्मा पूज्य एव न संशयः ॥१०॥ ॥ब्रह्मांडपुराणे॥ ॥यागो दानं तपो होमः स्वा

30

ाह्निक॥

॥३०॥ ध्यायः पितृतर्पणं ॥ नस्मिन्नपतितलक्ष्मीर्वेऊर्ध्वपुण्ड्रं विनाकृतं ॥ ११ ॥ अशुचिर्योह्यनाचारो मन
सा पापमाचरन् ॥ शुचिरेव भवेन्नित्यं ऊर्ध्वपुण्ड्रांकितो नरः ॥ १२ ॥ ॥ व्यासः ॥ ॥ ॐ कवीन्द्रं सं नी
भ्रुतांमध्येदधी बिभर्त्ति यः ॥ बिनत्ति रूपं सोर्कस्य तमो नाशाय केवलं ॥ १३ ॥ ॥ इति तिलक
विधिः ॥ ॥ अथ प्रातः संध्याविधिः ॥ ॥ व्यासः ॥ ॥ प्रातः संध्यां सनक्षत्रां मध्याह्ने स्ना
नकर्मणि ॥ सादित्यां पश्चिमां संध्यामुपासीत यथाविधि ॥ १ ॥ अथाचम्य कुशैर्युक्तो
आसने सपवित्रके ॥ करसंपुटकं कृत्वा संध्यामित्थं समारभेत् ॥ २ ॥ नत्वाथ पुंडरीका
क्षमुपपातकनाशने ॥ ब्रह्मावाह्यैव यं प्रातः संध्यामुपास्महे ॥ ३ ॥ इत्थं कृत्वा तु सं
कल्पं कुर्यान्नाशाय पापिनां ॥ नद्यां नदे स्रुते तोये गृहे वा मकरस्थितैः ॥ ४ ॥ त्रिस्त्रिर्व्याहृ ॥३०॥
तिमंत्रैश्च प्रत्येकं मीलितैश्च तैः ॥ गायत्र्या च ततः कुर्यादभिषेकं तु तज्जलैः ॥ ५ ॥ स्पृजेद्दे
न्तुवेः स्यादिति गायत्र्याचाथ शिरसोऽस्पृशेत् ॥ कर्मीन सोदकं चैव दद्यादासनमात्मनः ॥ ६ ॥

पृथ्वित्वयाधृतालोकादेवित्वंविष्णुनाधृता॥त्वंचधारयमांदेविपवित्रंकुरुचासनं॥७॥
इतिब्रह्ममुखेमंत्रैरज्ञिज्ञिंबंलियेद्विजाः॥तेब्रह्मसदनंयांतितस्मात्तैःपरिमार्जयेत्॥८॥
न्यासः॥॥ॐभूर्विन्यस्यहृदयेभुवःशिरसिविन्यसेत्॥स्वरितीशिखायांतुगायत्र्याः
प्रथमंपदं॥९॥विन्यसेत्कवचेत्वि द्वानर्धितीयंनेत्रयोर्न्यसेत्॥तृतीयेनास्त्रविन्यासो
एषन्यासोघनाह्वानः॥१०॥अकारंनाभिदेशेतुउकारंहृदयेन्यसेत्॥मकारंमूर्धिविन्य
स्यएषन्यासोविमुक्तिदः॥११॥भूर्लोकंपादयोर्न्यस्यभुवोलोकंतुजानुनि॥स्वर्लो
कंतुकटिदेशेतुजठरेतुमहस्तथा॥१२॥जनोलोकंकंठदेशेतुमुखबिंबेतपस्तथा॥स
त्यंशिरसिविन्यस्यएषन्यासोमहाफलः॥१३॥गायत्र्याःफलदावर्णान्यस्ताःस्कंःक
मैकमेणि॥तकारंविन्यसेत्तस्मात्पादांगुष्ठद्वयोर्द्विजः॥१४॥सकारंगुल्फयोर्न्यस्यविका
रंजंघयोर्न्यसेत्॥तुकारंजानुदेशेतुवकारमूरुदेशके॥१५॥रेकारंगुददेशेतुणिकारंलि

न्हिकं॥

गकेन्यसेत्॥यंकारंकटिदेशेतुनकारंनाभिमंडले॥१६॥गोकारंजठरेकुंडेदेकारंस्तनयो
॥२१॥ र्द्वयोः॥यकारंहृदयेन्यस्यस्यकारंकंठएवच॥१७॥धीकारंवदनेविप्रामकारंतालुकेन्य
सेत्॥हिकारंनासिकाग्रेतुधिकारंनयनद्वये॥१८॥योकारंतुभ्रुवोर्मध्येद्वितीयंतु
ललाटके॥नकारंपूर्ववक्त्रेतुप्रकारंदक्षिणानने॥१९॥चोकारंपश्चिमेवक्त्रेदकारं
चोत्तरेमुखे॥याकारंविन्यसेन्मूर्ध्निअंसजनंसर्वतोन्यसेत्॥२०॥आपोगुह्येन्यसे
ज्ज्योतिश्चक्षुषुपरसोमुखे॥अमृतंजानुनिब्रह्महृदयेभूःपदद्वये॥२१॥भूर्नीनोला
लाटेस्वरोंकारंमूर्ध्निविन्यसेत्॥एवंकृत्वाशिरोन्यासंसर्वपापैःप्रमुच्यते॥२२॥गाय
त्रीत्र्यक्षरांबालांसाक्षसूत्रकमंडलुं॥रक्तवस्त्रांचतुर्वक्त्रांहंसवाहनसंस्थितां॥२३॥ ॥२१॥
स्ना०२ ब्रह्माणींब्रह्मदैवत्यांब्रह्मलोकनिवासिनीं॥आवाहयाम्यहंदेवीमायांतींसूर्यमंडलात्॥२४॥
आगच्छवरदेदेवित्र्यक्षरेब्रह्मवादिनि॥गायत्रिछंदसांमातर्ब्रह्मयोनिनमोस्तुते॥२५॥

ॐकारस्य ऋषिर्ब्रह्मा परमात्माथ देवता ॥ प्रोकं छंदश्च गायत्रं नियोगः सर्वकर्मसु ॥ २६ ॥ व्या
हृतीनां तु सप्तानामृषिर्दैवतमुच्यते ॥ छंदांसि विनियोगश्च कथितो वेदपारगैः ॥ २७ ॥ विश्वा
मित्रो भरद्वाजो जमदग्न्यथ गोतमः ॥ अत्रिर्वशिष्ठः कस्यपो मुनयः सप्तकीर्तिताः ॥ २८ ॥ गाय
त्र्यनुष्टुबेवतुष्टुं त्रिष्टुप्बृहती पंक्तिरेव च ॥ उष्णिक् चैव जगती चैव छंदांस्येतानि सप्त वै ॥ २९ ॥ अग्नि
र्वायुस्तथा दित्यो वास्पतिर्वरुणस्तथा ॥ इंद्रश्च विश्वेदेवाश्च देवताः समुदाहृताः ॥ ३० ॥ =
प्राणस्यायमने चैव विनियोग उदाहृतः ॥ एतास्तु व्याहृतीः सप्त यः स्मरन्आ [illegible] संयमे ॥ ३१ ॥
उपासीतं न चैतेन विघ्नं तु वनसप्तकं ॥ अग्निरेव मुखं यस्या विश्वामित्र ऋषिस्तथा ॥
सविता देवता चैव गायत्री त्रिपदा हि सा ॥ ३२ ॥ ॐमापोज्योतिरित्येष मंत्रो वैते शिरःप
कं ॥ तस्य प्रजापतिश्चार्षं छंदो हीनं तु लक्षितं ॥ ३३ ॥ ब्रह्माग्निवायुसूर्याश्च देवताः स
मुदाहृताः ॥ प्राणस्यायमने चैव विनियोगः प्रकीर्तितः ॥ ३४ ॥ ॥ कात्यायन ॥ ॥ ॐ नमो नग

३२

आह्निक ॥

वंतेधास्तु देयायमंत्रतः ॥ परिक्षिप्यजलं मूर्ध्नि समंतांप्राणमभ्यसेत् ॥ ३५ ॥ रक्षार्थं वारि
॥ ३२ ॥ चात्मानं परिक्षिप्य समंततः ॥ प्राणायामत्रयं कुर्यात्संध्यासु च तिसृष्वपि ॥ ३६ ॥ सूर्य
श्चमेतिमंत्रस्य ऋषिर्नारायणः स्मृतः ॥ सूर्यो देवताऽनुष्टुप्छंदो नियोगः प्राशने मतः ॥ ३७ ॥
प्रातरनेन मंत्रेण अभिमंत्र्य जलं पिबेत् ॥ पीत्वा पश्चाद्द्विराचम्य ततो मार्जनमाचरे
त् ॥ ३८ ॥ ॥ शौनकः ॥ ॥ सायमग्निश्चमेत्युक्त्वा प्रातः सूर्येत्यपः पिबेत् ॥ आपः पुनंतु
मध्याह्ने तत आचमनं चरेत् ॥ ३९ ॥ आपो हि ष्ठेति तिसृणां सिंधुद्वीप ऋषिः स्मृतः ॥
आपो देवता गायत्री छंदो मार्जनकर्मणि ॥ ४० ॥ ॥ बैजवापायनः ॥ ॥ आपो हि ष्ठेति सूक्ते ॥ ३२ ॥
न स्नैर्मार्जनमाचरेत् ॥ यस्यक्षयायेति जलं मकुरं प्रक्षिपेद्बुधः ॥ ४१ ॥ ॥ नारायणः ॥ ॥
पादांते मार्जनं कुर्याद्दृगंते वा समाहितः ॥ ऋचश्चांतेऽथवा कुर्याच्छिष्टानां मतमीदृशं ॥ ४२ ॥ न घां
तीर्थे ह्रदे वापि नाङ्गनेमन्मंयेपिबा ॥ सौवर्णे राजते ताम्रे पात्रे वा मरुसंभवे ॥ ४३ ॥ कृत्वा

पोचामहस्तेन संध्योपासनमाचरेत् ॥ धारास्युतेन तोयेन मार्जनं स्याद्विगर्हितं ॥ पितरोन प्र
शंसंति देवला ऋषिसत्तमाः ॥ ४५ ॥ मार्जनं तर्पणं श्राद्धं न कुर्याद्वारिधारया ॥ कुर्याच्चेद्वारि
धाराभिस्तत्सर्वं निःफलं भवेत् ॥ ४६ ॥ सुमित्रिया दुर्मित्रिया द्वेपङ्कं षिप्रजापतिः ॥ रुधिरा
पोद्वैतौ दैवताश्च आदानक्षेपयोर्मते ॥ ४७ ॥ सुमित्रिया न इत्यञ्जलिं मुद्धरेद्देवतास्मरन् ॥
दुर्मित्रियाइति द्वेष्यं स्मरंश्चापः प्रक्षिंचयेत् ॥ ४८ ॥ सुमित्रियेति चादाय जलं दुर्मित्रिया
क्षिपेत् ॥ जंतुहीने स्थले विप्रो रात्रमेतद्विधं पति ॥ ४९ ॥ द्रुपदादिवेति मंत्रस्य प्राजा
पत्यश्चिनाद्दयः ॥ ऋषयश्चापो देवताश्चानुष्टुप्प्रक्षेपकर्मणि ॥ ५० ॥ जलं पूर्णं तु चुल
कं नासिकाग्रे विधृत्य च ॥ प्राणं निरुध्य तु पदां पठित्वा तज्जलं क्षिपेत् ॥ ५१ ॥ ऋतं च
सत्यं चेत्यघमर्षण ऋषि ऋस्यतै ॥ भाववृत्तो देवानुष्टुप्छंदः प्रक्षेपकर्मणि ॥ ५२ ॥
ऋतं चेति मंत्रेण सलिलं पर्वर्व क्षिपेत् ॥ पश्चाज्जलैः स्पृशे नासा लोचनं च

33

न्हि.कृ.॥

॥२१॥

स्फुलिंगं ॥५३॥ ॥योगी॥ ॥गृहित्वा पाणिना वारि स्वस्त्रास्त्रेणाभिमंत्रयेत् ॥ विभ्यपान्नासि
काग्रेतु निरुंध्यात्प्राणमारुतं ॥५४॥ एवं तु पाप्य चात्मानं द्रुपदस्याघमर्षणं ॥ तथा लो
यं परिक्षिप्य उपस्थ्योत्तरोंबुना ॥५५॥ ॥व्यासः॥ ॥करस्थं तोयमाघ्राय गायत्र्या चाभिमं
त्रितं ॥ आदित्याभिमुखस्तिष्ठन् त्रिः क्षिपेत्संध्ययोर्द्वयोः ॥५६॥ मध्याह्ने तु सकृद्देयं क्षेपणी
यं द्विजातिभिः ॥ उदकं प्रक्षिपेद्यस्मात्तत्कारणमतः शृणु ॥५७॥ ॥कश्यपः॥ ॥त्रिंशत्कोट्यो
महावीरा मंदेहा नाम राक्षसाः ॥ कृतघ्ना दारुणा घोराः सूर्यमिच्छंति खादितुं ॥५८॥ ततो दे
वगणाः सर्वे ऋषयश्च तपोधनाः ॥ उपासंते महासंध्यां प्रक्षीपंत्युदकांजलिं ॥५९॥ दह्यंते तेन
ते दैत्या वज्रीभूतेन वारिणा ॥ एतस्मात्कारणाद्विप्रः संध्यां नित्यमुपासते ॥६०॥ ॥विष्णुपुरा ॥३२॥
णात् ॥ ॥तस्मान्नोल्लंघयेत्संध्यां सायं प्रातर्द्विजोत्तमः ॥ उल्लंघयति यो मोहात्स याति नरकं
ध्रुवं ॥६१॥ पश्चाज्जपं न सावित्रीं प्रादक्षिण्यनिवर्तनं ॥ कुर्यात्तोयेन नासां च चक्षुःश्रोत्रम्

पस्थरोत् ॥ ६३ ॥ ॥ स्मृत्यंतरात् ॥ ॥ हस्ताभ्यांस्वाञ्जलिं कृत्वा प्रातस्तिष्ठे द्दिवाकरं ॥ मध्या
न्हे च रुन्द्रबाहू सायं मुकुलितौ करौ ॥ ६४ ॥ उदयं च तथोदुत्यं प्रस्कण्वोत्र ऋषिः स्मृतः ॥
सविता देवता छंदोनुष्टुप् गायत्र्यनुक्रमात् ॥ ६५ ॥ चित्रमांगिरसः कुत्सो ऋषिः सूर्यश्च
देवता ॥ त्रिष्टुप्छंदस्तच्चक्षुरिति दध्यंङाथर्वणो मुनिः ॥ ६६ ॥ सूर्यश्च देवता छंदः पुरो
ष्णीगिति च स्मृतः ॥ नियोग एषां मंत्राणामुपस्थाने रवेः स्मृतः ॥ ६७ ॥ ॥ व्यासः ॥ ॥
अथोदयं तमुदुत्यं चित्रं तच्चक्षुरित्यपि ॥ तिष्ठेद्दिवाकरं प्रातः सायं संध्याह्न एव च ॥
॥ ६८ ॥ तेजोसीति जपेन्मंत्रं गायत्र्यावाहने द्विजः ॥ आवाह्य तु जपेदोजो गायत्रीं ता
महाफलां ॥ ७० ॥ ऋषिस्तुरीयविमलः परमात्मा च देवता ॥ गायत्री चन्वै छंदो नियु
क्तो मोक्षकर्मणि ॥ ७१ ॥ गायत्र्येकपदीत्यादि गायत्र्याः प्रार्थनं चरेत् ॥ नमस्तेस्तु तु
रीयायेति नमस्कृत्य तु तां जपेत् ॥ ७२ ॥ ॥ अथ जपलक्षणं ॥ याज्ञवल्क्यः ॥ ॥ ॐ

न्हिक।।

।।३४।।

कारंपूर्वमुच्चार्यभूर्भुवःस्वस्तथैवच ।। गायत्रीप्रणवश्चांतेजपोह्येवमुदाहृतः ।।७३।। ध्यायेन्मन
सामंत्रंजिह्वोष्टौनविचालयेत् ।। नकंपयेच्छिरोग्रीवांदंतान्नैवप्रकाशयेत् ।।७४।। यक्षराक्षसभू
तानिसिद्धविद्याधरोगणाः ।। यस्मात्यक्तावंगृह्णंतितस्माद्गुप्तंतुकारयेत् ।।७५।। ।।मंत्रः।। ।।वि
धियज्ञाज्जपयज्ञोविशिष्टोदशभिर्गुणैः ।। उपांशुःस्याच्छतगुणःसहस्रोमानसःस्मृतः ।।७६।।
।।उपांशुलक्षणं।। ।।ध्वनिनाशब्दंजपोयस्तुचलज्जिह्वद्विजस्तुयः ।। उपांशुंतंजपंप्राहुर्मनसा
मानसंबुधाः ।।७७।। ।।जपमालालक्षणंस्मृत्यंतरात् ।। ।।अरिष्टपुत्रजीवश्चशंखपद्मोम
णिस्तथा ।। कुशग्रंथिश्चरुद्राक्षाउत्तमंचोत्तरोत्तरं ।।७८।। अष्टोत्तरशतंकुर्याच्चतुःपंचाशि
कापिवा ।। अष्टाविंशतिकांकुर्यात्ततोनैवाधमाधिका ।।७९।। अंगुल्यःसमरंभाग्यपरि ।।८२।।
पर्णेदक्षानवाः ।। निश्चलाग्रंथितालयाछिन्नसूत्रेणग्रंथितापापखंडाख्याःपुराणगः ।।८०।।
मःकाद्दुःखप्रदाग्रोग्रंथितासिंघनंतुयु ।। तस्मात्तुतादृशीमालानायर्द्धनीयाप्रयत्नतः ।।८१।।

स्कांदे॥ ॥तर्जन्या न स्पृशेत्सूत्रं कंपायं न नखैर्नयेत्॥ अंगुष्टपर्वमध्यास्थापरिवर्त्तं समाचरेत्॥८३॥
मध्यमाकर्षणं तस्याः सर्वसिद्धिप्रदायकं॥ नान्यांगुलिभिराकर्षेन्नरेस्लेनैतथास्यरोत्॥८४॥
गईश्वरउवाच॥ ॥छिन्नोष्ठो वा विकर्मस्थः संलिप्तः सर्वपातकैः॥ नासौ लिप्यति पापेन रुद्रा
क्षस्यावधारणात्॥८५॥ रुद्राक्षं कंठआबध्य श्वापि व मानवोपि वा॥ सोपि रुद्रपदं याति
किं पुनः शुचिमानसः॥८६॥ लक्षं तु स्पर्शनात्पुण्यं कोटिर्भवति चालनात्॥ दशकोटिसह
स्राणि धारणाल्लभते फलं॥८७॥ लक्षकोटिसहस्राणि लक्षकोटिशतानि च॥ जपनाल्ल
भते पुण्यं नात्र कार्या विचारणा॥८८॥ ॥योगीश्वरः॥ ॥अनावेलक्ष मालयाः कुशाग्र
ध्याथपाणिना॥ जप एव तु कर्त्तव्यो एकाग्रमनसा सदा॥८९॥ छलतो नानो कर्मोपानं सायं मा
धोमुखो करे॥ मध्ये तिर्यक्करे ओ क्रोडपन्यासउदाहृतः॥९०॥ ॥अथ जप गणनाप्रकारः॥
॥दक्षः॥ ॥अनामिकायवोमध्यस्तस्मादधः क्रमेण तु॥ तर्जन्यास्याद्यपांतं तु यजमानिः

36

फलं न भवेत्॥६१॥ ॥तत्र मेरुलक्षणं॥ ॥मध्यमादिद्वयं पर्वजपकाले विवर्जयेत्॥एतन्मेरु
र्विरूर्विज्ञानीया द्रङ्गाणि ब्रह्मणा स्वयं॥६२॥ ॥अथ जपसंख्याफलश्रुतिः॥ ॥सप्तावर्त्तीपु
नाशेनं दशभिः प्रापयेद्दिवं॥ अष्टाविंशतिसान्यस्ता नयते लोभ्रमालयं॥६३॥ अष्टोत्त
रशतं जप्ता तारयेज्जन्मसागरात्॥ ॥व्यासः॥ ॥दशभिर्जन्मजनितं शतेन च पुराकृतं॥
त्रिजन्मजं सहस्रेण गायत्री हंति किल्बिषं॥६५॥ पापुनर्लक्षोदियानिष्ठेद्रुत्रिंनीत्याप्नुस्वर्ये
दत्॥ जप्त्वा सहस्रं गायत्र्याः शुद्धो ब्रह्मवधादपि॥६६॥ सर्वेषामेव पापानां संकरे समुपस्थि
ते॥ दशसाहस्रिको भ्यासो गायत्र्याः शोधकः परः॥६७॥ ॥पद्मपुराणे॥ ॥पितृहा मा
तृहा चापि भ्रूणहा गुरुतल्पगः॥ ब्रह्मस्वाहायहारी च यश्च विप्रः सुरां पिबेत्॥६८॥ स
गायत्र्याः सहस्रेण पूतो भवति मानवः॥६९॥ मानसवाचिकपापविषयं॥ ॥कायि

केमलपायश्चित्तस्त्रवणात् ॥ ॥ योधीतेहन्यहंन्येतांत्रीणिवर्षाणिमानवः ॥ ब्रह्मपरमम
भ्येतिवायुस्त्वस्यचमूर्तिमान् ॥११॥ ॥योगी॥ ॥लक्ष्मीमासीनश्चजपंश्चागात्पतितादि
कान् ॥हस्त्वाला वायुपस्थसूपात्राप्यस्नात्ताधिशुध्यति ॥१॥ अथजपनिषेधः ॥गोभिलः॥ ॥
नोदकस्थोजपेत्साद्गोणायत्रीवेदमातरं ॥ अग्नित्रयमुखंयस्मात्तस्मादुत्थायतांजपेत् ॥
॥२॥ नार्द्रवासाजपंकुर्याद्धोमंदानंप्रतिग्रहं ॥ सर्वेतच्छास्त्रसंविंद्याद्बहिर्जानुचयत्फलं ॥
॥३॥ नजपेत्सास्मात्क्रम्यनचैवहितथाकृतौ ॥ नचासमाहितमनानचसंस्त्रावयन्जपेत् ॥४॥
मौ॰२ नचक्रमंन्नचहसंनपार्श्वमवलोकयन् ॥ नचाश्रितोनजल्पंश्चनप्रावृतशिराजपेत् ॥५॥
॥बृहस्पतिः॥ ॥मनःसंहरणंशौचंमौनंमंत्रार्थचिंतनं ॥ अव्यग्रत्वमनिर्वेदोजपसंपत्तिहे
तवः ॥६॥ ॥अथगायत्रिप्रशंसा॥ ॥गायत्रींयोनजानातिवृथातस्यपरिश्रमः ॥ एककल

37

आह्निक॥

॥३६॥

श्चतुरोवेदागायत्रिंचैकतःसमाः॥७॥ ॥यमः॥ ॥नतथावेदजाप्येन पापं निर्दहते द्विजः॥
यथाजपेन गायत्र्याः सर्वपापैः प्रमुच्यते॥८॥ ॥मनुः॥ ॥गायत्रीमात्रसारोपि वरं वि
प्रः सुयंत्रितः॥ नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी॥९॥ विश्वतश्चक्षुरितिऋषि
र्भौवनदेवता॥ विश्वकर्मा त्रिष्टुप्छंदो उपस्थाने नियुज्यते॥१०॥ एवं स्मृत्वा ऋषिछंदो
विश्वतश्चक्षुरित्यृचं॥ जप्त्वा प्रदक्षिणं कुर्याद्दुपस्थाय दिवाकरं॥११॥ उपविश्यासने
पश्चात्कुर्यात्संपुटितौकरौ॥ देवागातवीति मंत्रस्य मनसस्पतिरृषिः स्मृतः॥१२॥ वातो
देवता विराट्छंदो नियोगस्तु विसर्जने॥ करेनीरं समादाय देवागातवीति मंत्रतः॥ निवे
दयेज्जपप्रांतं प्रयोगस्तत्र पठ्यते॥१३॥ प्रातः संध्यां गतस्तेन गायत्रीजपकेन च॥
साष्टेन शतसंख्येन ब्रह्मात्मा प्रीयतां रविः॥१४॥ सवित्रेन मडलस्थको गायत्र्येकप

॥३६॥

शीलि च ।। उपस्थाय च गायत्रीम्भूर्भुवः स्वर्विसर्जयेत् ।।१६।। यदक्षरमिति प्रार्थ्य संध्यां दे
वीं द्विजोत्तमः ।। उत्तरे शिखरे स्याद्रिपृष्ठि स्यातां विसर्जयेत् ।।१६।। पूर्वं यच्च षडंगानि तस्य
प्रातरनग्निमान् ।। सूर्यप्रजापतिभ्यां च नमउत्क्रोडवं क्षिपेत् ।।१७।। आचार्यो चार्यव
र्येण नागना येन धीमता ।। श्लोकैः संध्या कृता लोके श्लोकैः स्नानं च गन्ता ।।१९।। गद्यैः संध्या
विधिं वक्ष्ये शिश्रूणां सुखबुद्धये ।। नपौनरुक्तता दोषशंका कार्या विचक्षणैः ।।१२०।। ।।
तत्रेत्थं विधिः ।। ।।ॐ पुंडरीकाक्षाय नमः ।। उपात्तदुरितक्षयार्थं ब्रह्मावासे प्रातःसंध्योपासनम
हं करिष्ये ।। अथाग्निहोत्रकमंत्रः ।। ॐ पुनातु ।। ॐ भूः पुनातु ।। ॐ भुवः पुनातु ।। ॐ स्वः पुनातु ।।
ॐ महः पुनातु ।। ॐ जनैः पुनातु ।। ॐ तपः पुनातु ।। ॐ सत्यं पुनातु ।। ॐ तत्सवितुर्वरेण्यं भर्गो
देवस्य धीमहि ।। धियो यो नः प्रचोदयात् ।। ॐ सर्वं पुनातु ।। ततः उदकं भूर्भुवः स्वरिति नु विप्र

क्षिपेत्॥ ॐ तत्सवितुरिति शिखां स्पृशेत्॥ हस्तेन सोदकेनासनं कुर्यात्॥ ॐ पृथ्वी त्वया धृता लोका
देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवि पवित्रं कुरु चासनं॥ अथ षडंगन्यासः॥ ॐ भूः हृदयाय
नमः॥ ॐ भुवः शिरसे स्वाहा॥ ॐ स्वः शिखायै वौषट्॥ ॐ तत्सवितुर्वरेण्यं कवचाय हुं॥ ॐ भर्गो देव
स्य धीमहि नेत्रत्रयाय वौषट्॥ धियो यो नः प्रचोदयात् अस्त्राय फट्॥ अथ प्रणवन्यासः॥ अकारं
नाभौ॥ उकारं हृदये॥ मकारं मूर्ध्नि॥ अथ करन्यासः॥ अंगुष्ठाये तु गोविंदं तर्जन्यां तु महीधरं॥
मध्यमायां हृषीकेशं अनामिक्यां त्रिविक्रमं॥ कनिष्ठिम्यां न्यसेद्विष्णुं करमध्ये च माधवं॥ कर
पृष्ठे जनार्दनं॥ एवं न्यासं करे कृत्वा ततः सर्वं चाक्षयं भवेत्॥ अथ व्याहृतीन्यासः॥ ॐ भूः पादयोः॥
ॐ भुवः जान्वोः॥ ॐ स्वः ऊर्वोः॥ ॐ महः जठरे॥ ॐ जनः कंठे॥ ॐ तपः मुखे॥ ॐ सत्यं मूर्ध्नि॥ अथ गा ॥२७॥
यत्री न्यासः॥ ॐ तकारं पादांगुष्ठयोः॥ ॐ सकारं गुल्फयोः॥ ॐ विकारं जंघयोः॥ ॐ तुकारं जान्वोः॥

ॐ वकारं ऊर्वोः ॥ ॐ रेकारं गुह्ये ॥ ॐ णिकारं लिंगे ॥ ॐ यंकारं कघां ॥ ॐ भेकारं नाभौ ॥ ॐ गोकारं उदरे ॥
ॐ देकारं स्तनयोः ॥ ॐ वकारं कंठे ॥ ॐ धीकारं मुखे ॥ ॐ मकारं तालुकादेशे ॥ ॐ हिकारं नासिकाग्रे ॥
ॐ धिकारं नेत्रयोः ॥ ॐ योकारं भ्रुवोर्मध्ये ॥ द्वितीयोकारं ललाटे ॥ ॐ नकारं पूर्वमुखे ॥ ॐ प्रकारं दक्षि-
णमुखे ॥ ॐ चोकारं पश्चिममुखे ॥ ॐ दकारं उत्तरमुखे ॥ ॐ याकारं मूर्ध्नि ॥ ॐ व्यंजनं तकारं सर्वतः ॥
अथ शिरोन्यासः ॥ ॐ आपोगुह्ये ॥ ॐ ज्योतिश्चक्षुषि ॥ ॐ रसोमुखे ॥ ॐ अमृतंजानुनि ॥ ब्रह्म
हृदये ॥ ॐ भूः पादयोः ॥ ॐ भुवः नाभौ ॥ ॐ स्वः ललाटे ॥ ॐ कारं मूर्ध्नि ॥ अथावाहनं ॥ गायत्रि
त्र्यक्षरां बालां साक्षसूत्रकमंडलुं ॥ रक्तवस्त्रां चतुर्वक्त्रां हंसवाहनसंस्थितां ॥ ब्रह्माणी ब्र-
ह्मदैवत्यां ब्रह्मलोकनिवासिनीं ॥ आवाहयाम्यहं देविमायांतीं सूर्यमंडलात् ॥ आगच्छ
वरदे देवि त्र्यक्षरे ब्रह्मवादिनी ॥ गायत्रिछंदसां मातब्रह्मयोनिनमोस्तुते ॥ ॐ कारस्य ब्रह्मा

क॥

ऋषिःपरमात्मादेवतागायत्रीछंदःसर्वकर्मारंभेविनियोगः॥सप्तव्याहृतीनांविश्वामित्रजमदग्निभरद्वा
२८॥ जगोतमात्रिवसिष्ठकश्यपाऋषयःअग्निवायुसूर्यबृहस्पतिविश्वेदेवादेवतागायत्र्युष्णिगनुष्टु
पबृहतिपंक्तित्रिष्टुप्जगतिछंदांसितत्सवितुरितिविश्वामित्रऋषिःसवितादेवतागायत्रीछंदः
आपोज्योतिरितिब्रह्माऋषिःयजुःअग्निवायुसूर्यादेवताप्राणायामेविनियोगः॥ॐनमोभगव
तेवासुदेवायेत्यात्मनःप्रदक्षिणमुदकंक्षिपेत्॥ॐभूःॐभुवःॐस्वःॐमहःॐजनःॐतपःॐसत्यं
ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि।धियोयोनःप्रचोदयात्ॐआपोज्योतीरसोमृतंब्रह्मभूर्
र्भुवःस्वरोम्॥इतिप्राणायामत्रयंकुर्यात्॥सूर्यश्चमेतिमंत्रस्यनारायणऋषिःसूर्योदेवताअनुष्टुप्छंदः
अंबुप्राशनेविनियोगः॥ॐसूर्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यःपापेभ्योरक्षंतांयद्रात्र्यापापा ॥२८॥
पमकार्षंमनसावाचाहस्ताभ्यांपद्भ्यामुदरेणशिश्नारात्रिस्तदवलुंपतुयत्किंचदुरितंमयिइदम

गायत्रीछंदः॥२

हमम्रतयोनौसूर्यैज्योतिषिजुहोमिस्वाहा॥इतिमंत्रेणप्राशयेत्॥ततोद्विराचमनं॥आ
पोहिष्ठेतितिसृणांसिंधुद्वीपऋषिःआपोदेवतामार्जनेविनियोगः॥ॐआपोहिष्ठामयोभु
वस्तानऊर्जेदधातन॥महेरणायचक्षसे॥योवःशिवतमोरसस्तस्यभाजयतेहनः॥उश
तीरिवमातरः॥तस्माअरंगमामवोयस्यक्षयायजिन्वथ॥आपोजनयथाचनः॥इस्कंद
कंप्रक्षिपेत्॥सुमित्रियादुर्मित्रियाइतिद्वयोःप्रजापतिऋषिःयजुःआपोदेवताआत्म
नप्रक्षेपयोःविनियोगः॥सुमित्रियानआपओषधयःसंतु॥दुर्मित्रियास्तस्मैसंतुयो
स्मान्द्वेष्टियंचवयंद्विष्मः॥द्रुपदादिवेतिप्रजापत्यश्विसरस्वत्याऋषयःआपोदेवता
अनुष्टुप्छंदःअंबुप्रक्षेपणेविनियोगः॥द्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव॥
पूतंपवित्रेणेवाज्यमापःशुंधंतुमैनसः॥ऋतंचसत्यंचेत्यघमर्षणऋषिःअनुष्टुप्छंदः
भाववृत्तोदेवताउदकप्रक्षेपणेविनियोगः॥ऋतंचसत्यंचाभीद्धात्तपसोध्यजा।

॥आह्निक॥

॥२९॥

यत॥ ततो रात्र्यजायत ततः समुद्रो अर्णवाः समुद्रदर्णवाद्धिसंवत्सो अजायत॥
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी॥ सूर्याचंद्रमसौ धाता यथापूर्वमक
ल्पयत दिवं च पृथिवीं चांतरिक्षमथोस्वाहा॥ ततो गायत्री मंत्रेण सूर्यायार्घ्यत्र
यं दद्यात्॥ ततो गायत्री मंत्रेण प्रदक्षिणं उदकेन दक्षिणनासिका चक्षुश्रोत्रस्प
र्शनं॥ उद्वयंतमितिप्रस्कण्व ऋषिः सूर्यो देवता अनुष्टुप्छंदः सूर्योपस्थाने विनि
२५ योगः॥ चित्रं देवानामिति कुत्सांगिरस ऋषिः सूर्यो देवता त्रिष्टुप्छंदः सूर्योपस्थाने
विनियोगः॥ तच्चक्षुरिति दध्यंगाथर्वण ऋषिः पुरउष्णिक्छंदः सूर्यो देवता सूर्यो
पस्थाने विनियोगः॥ उद्वयंतमसस्परि स्वः पश्यंत उत्तरं देवं देवत्रा सूर्यमगन्म
ज्योतिरुत्तमं॥ उदुसंजातवेदसं देवं वहंति केतवः॥ दृशे विश्वाय सूर्यं॥ चित्रं देवा
नामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः॥ आप्रा द्यावापृथिवी अंतरिक्षं ॥२९॥

सूर्यआत्माजगतस्तस्थुषश्च॥तच्चक्षुर्देवहितंपुरस्ताच्छुक्रमुच्चरत्॥पश्येमश
रदःशतंजीवेमशरदःशतंशृणुयामशरदःशतंप्रब्रवामशरदःशतमदी
नाःस्यामशरदःशतंभूयश्चशरदःशतात्॥तेजोसीतिपरमेष्ठीप्रजापति
ऋषिःआज्यंदेवतागायत्रीछंदःगायत्र्यावाहनेविनियोगः॥तेजोसिशुक्रम
स्यमृतमसिधामनामासिप्रियंदेवानामनाधृष्टंदेवयजनमसि॥तुरी
यपदस्यविमलऋषिःपरमात्मादेवतागायत्रीछंदःगायत्र्युपस्थानेविनियो
गः॥गायत्र्यस्येकपादिद्विपादित्रिपादिचतुष्पद्यपद्यसिनमस्तेतुरीयायदर्शता
यपदायपरोरजसेसावदोम्॥ततोगायत्रीजपः॥विश्वतश्चक्षुरितिविश्वक
र्माभौवनऋषिःविश्वकर्मादेवतात्रिष्टुप्छंदः[illegible]पस्थानेविनियोगः॥ॐवि
श्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात्॥संबाहुभ्यांधम

आन्हिक॥

त्रिसंपत्तैर्घीयाम्भमिझनयं देवशाकः॥ एकं च क्रंरुपेयस्यादिव्यं कनकस्रजं॥ समेत्तव
॥४०॥ उत्तुप्रीतोप्रभहस्तो दिवाकरः॥ ततः प्रदक्षिणं॥ दिग्भागानु विद्धइति मनसस्प॥ त्रिऋषिःवा
तो देवता विराड्छंदः गायत्रीजपविसर्जने विनियोगः॥ दिग्भागानुविदोगानुवित्वागनु
ति४ मित॥ मनसस्पढूं मं देवयज्ञं स्वाहावातेधाः॥ अनेन गायत्रीजपेन प्रातःसंध्यांगमूले
नब्रह्मरूपी सविता प्रीयतां॥ ॐ सवित्रे नमः॥ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्य
पद्यसि॥ नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदों॥ ततो गायत्री॥ ततः संध्यांप्रा
र्थयेत्॥ यदक्षरं पदभ्रष्टं मात्राहीनं तु यद्भवेत्॥ तत्सर्वं क्षम्यतां देवि कश्यपप्रीयवादि
नि॥ ततः संध्याविसर्जनं॥ उत्तरे शिखरे देवि भूम्यां पर्वतमूर्धनि॥ ब्राह्मणेभ्योह्यनुज्ञा ॥४०॥
ता गच्छ देवि यथासुखं॥ हस्तदक्षप्रक्षेपः॥ ततः श्रोताचमनं॥ पूर्ववत्षडंगन्यासः॥ ततो
जपहोमः॥ ॐ सूर्याय नमः॥ ॐ प्रजापतये नमः॥ ॥कात्यायनः॥ ॥आदित्येनुदितेसस्य

संध्योपास्तिमकुर्वतः ॥ स्नात्वा प्राणांस्त्रिरायम्य गायत्र्यक्षराणं जपेत् ॥१॥ ॥ अथ गायत्रिअ
सक्षरविवरणं ॥ ॥ ॐ तत्कारस्य वशीष्ठ ऋषिः गायत्री छंदः अग्निर्देवता पृथ्वी बीजं प्रहस
शक्तिः सुमुखमुद्रा पंकजमध्यस्थपीतवर्णं ध्यात्वा पादांगुष्ठयोर्न्यसेत् स्हलिपातकं ॥१॥ सका
रस्य भरद्वाजऋषिः पंक्तिः छंदः प्रजापतिर्देवता आपो बीजं प्रज्ञासा शक्तिः संपुटमुद्रा अतसी
पुष्पवर्णं पंकजमध्यस्थं ध्यात्वा गुल्फयोर्न्यसेत् उपपातकं सकारेण प्रणश्यति ॥२॥ विकारस्य
गोतमऋषिः अनुष्टुप्छंदः सोमो देवता तेजो बीजं निस्पा शक्तिः विततमुद्रा शुक्लवर्णं पंकजमध्यस्थं
ध्यात्वा जंघयोर्विन्यसेत् महापातकनाशनं ॥३॥ तुकारस्य भ्रमकेत ऋषिः त्रिष्टुप्छंदः इंद्रो देव
ता वायु बीजं ॥ विभ्रमजा शक्तिः विस्तृतमुद्रा इंद्रनीलवर्णं पंकजमध्यस्थं ध्यात्वा गुदे विन्य
सेत् अगम्यागमनोद्भवं पापं रेकारेण प्रणश्यति ॥४॥ एकारस्य लोहित ऋषिः गायत्री छंदः
सविता देवता आपो बीजं जया शक्तिः त्रिमुखमुद्रा विद्रुमवर्णं पंकजमध्यस्थं ध्यात्वा हृदये वि

ान्हिक॥

॥४१॥

न्यसेत् अन्नक्षन्नक्षत्कृतं पापं णकारेण विनश्यति ॥७॥ यंकारस्य गार्ग ऋषिः क्षं नैऋ छंदः नैर्ऋती देव
ता व्योमबीजं रंगं ला शक्तिः चतुर्मुखमुद्रा पीतवर्णं पंकजमध्यस्थं ध्यात्वा कटिमध्ये विन्यसेत् पुरु
हत्याकृतं पापं यकारेण प्रणश्यति ॥८॥ भकारस्य शातातप ऋषिः सत्यं छंदः पर्जन्यो देवता
उदानो बीजं कां ला शक्तिः पंचमुखमुद्रा ताम्रवर्णं पंकजमध्यस्थं ध्यात्वा नाभ्यां विन्यसेत् गुरु
हत्याकृतं पापं भकारेण प्रणश्यति ॥९॥ गोकारस्य सनत्कुमार ऋषिः अनुष्टुप् छंदः सरस्वती
देवता समानबीजं दुर्गा शक्तिः षण्मुखमुद्रा रक्तवर्णं पंकजमध्यस्थं ध्यात्वा जठरे विन्यसेत् गो
वधकृतं पापं गोकारेण प्रणश्यति ॥१०॥ देकारस्य सप्ततपा ऋषिः विराट् छंदः रुद्रो देवता श्रावं
बीजं सरस्वती शक्तिः अधोमुखमुद्रा श्यावर्णं पंकजमध्यस्थं ध्यात्वा स्तनयोर्विन्यसेत् स्त्रीवधकृ
तं पापं देकारेण विनश्यति ॥११॥ वकारस्य भार्गव ऋषिः पंक्तिश्छंदः आदित्यो देवता स्पर्शो बीजं ॥४२॥
विरूपा शक्तिः व्यापकांजलिमुद्रा शुक्लवर्णं पंकजमध्यस्थं ध्यात्वा हृदिमध्ये विन्यसेत् वाचोद्भवं

पापंचकारेणप्रणश्यति॥१२॥स्यकारस्य परात्परऋषिः प्रोष्ठपदादेवता रस्तोबीजं विशालाक्षा श
क्तिः शाकटमुद्रा पीतवर्णपंकजमध्यस्थं ध्यात्वा कंठे विन्यसेत् मनःकूटकृतं पापं स्यकारेण प्रण
श्यति॥१३॥ धीकारस्य विश्वामित्रऋषिः विज्ञानशक्तिः विराट्छंदः इंद्रो देवता रूपंबीजं [illegible] वि
धुसुंदरवर्णपंकजमध्यस्थं ध्यात्वा पाशामुद्रा पितृमातृवधकृतं पापं धीकारेण प्रणश्यति॥१४॥
मकारस्य ऋतुऋषिः अक्षरपंक्तिछंदः म[illegible]ो देवता गंधबीजं विमलाशक्तिः ग्रथितमुद्रा
पद्मरागवर्णपंकजमध्यस्थं ध्यात्वा नाडुं मध्ये विन्यसेत् आजन्मकृतं पापं मकारेण प्रण
श्यति॥१५॥ हिकारस्य दक्षऋषिः विराट्छंदः मित्रावरुणो देवता वाग्बीजं योगशक्तिः
सिंहाक्रांतमुद्रा शंखवर्णपंकजमध्यस्थं ध्यात्वा नासाग्रे विन्यसेत् स्थावरजंगमं विष
हिकारेण प्रणश्यति॥१६॥ धिकारस्य कश्यपऋषिः पंक्तिछंदः विश्वेदेवता पाणिबी
जं नित्याशक्तिः उन्मुखमुद्रा पद्मरागवर्णपंकजमध्यस्थं ध्यात्वा [illegible]ो विन्यसेत् प्राति

५७

॥४२॥

ब्रह्मकृतं पापं धिकारेण विनश्यति ॥१७॥ योकारस्य जमदग्न्य ऋषिः कात्यायनि छंदः वैश्वान
रो देवता पायुबीजं ज्ञानशक्तिः मुष्टिकमुद्रा रक्तवर्णपंकजमध्यस्थं ध्यात्वा पायुवोर्विन्यसेत्
प्राणिहत्याकृतं पापं योकारेण प्रणश्यति ॥१८॥ योकारस्य मैत्र ऋषिः ज्योतिष्मति छंदः
आदित्यो देवता पादबीजं विरक्तशक्तिः कूर्ममुद्रा शुक्लवर्णपंकजमध्यस्थं ध्यात्वा त्वला
धिन्यसेत् । निर्दहेत्सर्वपापानि अन्यैः पापैर्न लिप्यते ॥१९॥ नकारस्य वसिष्ठ ऋषिः दे
वि गायत्री छंदः परमात्मा देवता रूपं बीजं प्रीतिशक्तिः धाराहिमुद्रा पीतवर्णपंकजम
ध्यस्थं ध्यात्वा पूर्वमुखे विन्यसेत् सहस्रं जपेन्नरः श्रेष्ठो स गच्छेद्धिरडें पदं ॥२०॥ प्रकार
स्य आंगिरस ऋषिः भृछंदः कुबेरो देव मनो बीजं पद्मालया शक्तिः सिंहाक्रांतमुद्रा
नीलोत्पलवर्णपंकजमध्यस्थं ध्यात्वा दक्षिणमुखे विन्यसेत् सहस्रं जपेन्नरः श्रेष्ठो स ॥४२॥
गच्छेद्वैश्रवणं पदं ॥२१॥ चोकारस्य कात्यायन ऋषिः तुष्टुप्छंदः वामनो देवता बुद्धिबीजं

पाराशरी शक्तिः महाकांतमुद्रा पीतवर्णं पंकजमध्यस्थं ध्यात्वा पश्चिममुखे विन्य
सेत् अन्यदोषकृतं पातकं दहति ॥२२॥ हकारस्य गोतमऋषिः अनुष्टुप्छंदः सोमो
देवता अहंकारो बीजं प्रज्ञासाशक्तिः मुकुरमुद्रा श्यामवर्णं पंकजमध्यस्थं ध्यात्वा
उत्तरमुखे विन्यसेत् प्रत्यक्षं लाहिङोत्तमो ब्रह्मविष्णुशिवात्मकं मोक्षं प्राप्नोति ॥२३॥
याकारस्य कुंभक ऋषिः श्रीछंदः ब्रह्मा देवता चित्त बीजं नडाशक्तिः पल्लवमुद्रा धुकुव
र्णं पंकजमध्यस्थं ध्यात्वा शिरसि विन्यसेत् मोक्षं ददाति ॥२४॥ ॥ मूलगायत्रीकल्पः
समाप्तः ॥ ॥ श्रीवेदव्यासाय नमः ॥ ॥ अनामयं तत्सवितुर्वरेण्यं भर्गो हि देवस्य भुज्ञा
यधीमहि ॥ सततं सलिलै राहरं हितापधियो हि नः सततं प्रचोदयात् ॥१॥ परब्रमास्व
दत्यानानीति यत्प्राणिनां सदा ॥ लक्ष्मासा परमेशस्य सवितुः करुणात्मनः ॥२॥ स्वरूपं

॥आह्निक॥

॥४३॥

वरणीयंयत्प्रार्थनीयंसदाबुधैः॥शुद्धज्ञानोभुनप्रेमसुरपिंडैवंनवांछयेत्॥३॥शुद्धा
नंदविरक्तेनप्रार्थितंतन्मुमुक्षुणा॥वेदांतबुध्याचारूढंभर्गोदेहादिधारकं॥४॥तस्मि
न्नएवतुपारब्धानुसारधृतविग्रहः॥सच्चिदानंददेवस्यस्वरूपंचिंतयामहि॥५॥
धियोयानोदधोदेवप्रारब्धांतेप्रचोदयात्॥प्रकर्षेणप्रेरयतुस्वस्वरूपेसुखा
र्णवे॥६॥यथानपुनैरावर्त्तलक्ष्यंचित्केनचित्क्वचित्॥व्याख्येयमानुलोम्येनप्रा
तिलोम्येनसंप्रति॥७॥प्रचोदयात्प्रेरयतुजंतुलस्मान्महासुखं॥सुखंमेसर्व
दाभूयादुःखंमाभूत्कदेवहि॥८॥योतिरिक्तोधियोद्रष्टातंवयंचिंतयेमहि॥ ॥४३॥
चिंतनेतस्यदेवस्यज्ञानंभर्गःप्रजायते॥९॥ज्ञानाद्धरेएपश्रेष्ठंचफलमज्ञा
नसिद्धितः॥सवितुस्तन्निजंरूपंसच्चिदानंदसागरं॥१०॥श्रीमत्सत्यनाति

स्तनोर्ध्यां स्थिपंसन्मताभ्रुता ॥ अग्निर्धोनोपतिग्निषेवगायत्रीब्रह्मणासह ॥ ११ ॥ सोह
मस्मीत्युपासीतविधिनायेनकेनचित् ॥ तंविधिंसर्वदासेवेद्योगीपरमतत्त्ववित् ॥
॥ १२ ॥ ॥ इतिगायत्रीध्यानं ॥ ॥ अथगायत्रीतर्पणं ॥ ॥ प्राणायामोथसंकल्पो ऋषि
श्छंदस्तथैवच ॥ देवताचषडंगश्च आवाहनमतःपरं ॥ १ ॥ अस्मिन्कालेसर्वव्यापी
प्रीतयेगायत्रीतर्पणमहंकरिष्ये ॥ ॐ तत्सवितुरितिविश्वामित्रऋषिःगायत्रीछंदः
सवितादेवतातर्पणेवि० ॥ अथपूर्ववत्षडंगः ॥ ॐ भूर्भुवःस्वःपुरुषऋग्यजुःसाम
मयमंडलांतर्गतंसवितारमात्मानमावाहयिष्ये ॥ ॐ भूःपुरुषऋग्वेदायनमस्तर्प
यामि ॥ ॐ भुवःपुरुषयजुर्वेदायनमस्तर्पयामि ॥ तर्पयामीतिसर्वत्रानुषंगः ॥ ॐ स्वः
स्वःपुरुषसामवेदायनम० ॥ ॐ महःपुरुषअथर्ववेदात्मनेनम० ॥ ॐ जनःपुरुष

आन्हिक॥

॥४५॥

इतिहासपुराणायनम०॥ ॐ तपःपुरुषायसर्वांगमायनम०॥ ॐ सत्यंसर्वलोकायनम०॥
ॐ भूर्भुवस्वः पुरुषमंडलांतर्गतसवित्रेनम०॥ ॐ तत्ः एकापदागायत्र्यैनम० ॐ भुवः
द्विपदागायत्र्यैनम०॥ ॐ स्वः त्रिपदागायत्र्यैनम०॥ ॐ भूर्भुवःस्वःश्चतुष्पदागायत्र्यै
नम०॥ ॐ उषसेनम०॥ ॐ गायत्र्यैनम०॥ ॐ सावित्र्यैनम०॥ ॐ सरस्वत्यैनम०॥
ॐ वेदमात्रेनम०॥ ॐ पृथिव्यैनम०॥ ॐ अजायैनम०॥ ॐ रीलत्यैनम०॥ ॐ कौशि
क्यैनम०॥ ॐ सर्वापराजित्यैनम०॥ ॐ सहस्रमूर्त्यैनम०॥ ॐ अनंतानंतमूर्तये
नम०॥ मंत्रैरेभिस्तुयोनित्यंचतुर्विंशतिसंमिते॥ गायत्रींतर्पयेत्तेनतर्पितंसच
राचरं॥१॥ इतिगायत्रीतर्पणं॥ ॥योगयाज्ञवल्क्यः॥ ॥सर्वत्रावस्थितोविप्रोसंध्यो ॥४५॥
पासनतत्परः॥ ब्राह्मण्यान्नहीयेतअन्यत्रगमनोपिसन्॥१॥ यावंतोस्यांपृथि

यांतुयिकर्मस्थाद्विजातयः॥तेषांहिपावनार्थायसंध्यासृष्टास्वयंभुवा॥२॥एतद्विद्वायःसंध्यामुपास्तेत्रीं
सितव्रतः॥दीर्घमायुःसविंदेतसर्वपापैःप्रमुच्यते॥३॥ ॥व्यासः॥ ॥यस्तुतांकेवलांसंध्यामुपासीतसमु
एपन्लाकु॥तांपरित्यज्यकर्माणिकुर्वन्नाप्नोतिकिल्बिषं॥४॥ ॥यमः॥ ॥संध्यामुपासतेयेतुसततंशंसि
तव्रताः॥विधूतपापास्तेयांतिब्रह्मलोकंसनातनं॥५॥संध्यालोपस्यचाकृतःस्नानशीलश्चयःसदा॥
तंदोषानोपसर्पंतिगरुत्मंतमिवोरगाः॥६॥ ॥मनुः॥ ॥नोपास्तैनतिष्ठतियःपूर्वांनोपास्तेयश्चपश्चि
मां॥सशूद्रवद्बहिःकार्यःसर्वस्माद्द्विजकर्मणः॥७॥ ॥यमः॥ ॥अनागतांतुयेपूर्वांमपनीतांचपश्चिमां॥
विप्राःसंध्यांनतिष्ठंतिवृषलास्तउदाहृताः॥८॥जातकेसूतकेवापिसंध्याकर्मनसंत्यजेत्॥म
नसोच्चारयेन्मंत्रान्प्राणायामविवर्जितं॥९॥ ॥याज्ञवल्क्यः॥ ॥शिवविष्णुर्चनंदीक्षायस्यचाग्नि
परिग्रहः॥श्रौतेकर्मणितत्कालंस्नानःशुद्धिमवाप्नुयात्॥१०॥ ॥इतिश्रीउपाध्यायनागदेवविरचि

ह्न॥

।४५।।

तेआचारदीपेप्रातःसंध्याविधिः॥ अथाभिवादनविधिः॥ ॥पुराणम्॥ ॥उत्थायमातापितरौपूर्वमे
वाभिवादयेत्॥ आचार्यश्चततोनित्यमभिवाद्योविजानता॥१॥ ॥मनुः॥ ॥लौकिकंवैदिकंवा
पितथाध्यात्मिकमेवच॥ आददीतयतोज्ञानंतंपूर्वमभिवादयेत्॥२॥ अभिवादात्परोविप्रोज्या
यांसमभिवादयेत्॥ असौनामाहमस्मीतितंनामपरिकीर्तयेत्॥३॥ नहायनैर्नपलितैर्नवि
त्तैर्नचबंधुभिः॥ ऋषयश्चक्रिरेधर्मंयोनूचानःसनोमहान्॥४॥ विप्राणांज्ञानतोज्यैष्ठ्यंक्ष
त्रियाणांतुवीर्यतः॥ धनधान्येनवैश्यानांशूद्राणांत्वेवजन्मतः॥५॥ अवाच्योदीक्षितोना
म्नायवीयानपियोभवेत्॥ भोभवत्पूर्वकंत्वेनमभिभाषेतधर्मवित्॥६॥ ॥आपस्तंबः॥ ॥
स्वदक्षिणंबाहुंश्रोत्रसमंप्रसार्यब्राह्मणोऽभिवादयेत्॥ उरःसमंराजन्योमध्यसमंवैश्योनी ॥४५॥
चैःशूद्रःप्रांजलिःसर्वत्र॥७॥ ॥मनुः॥ ॥भोःशब्दंकीर्तयेदंतेस्वस्यनाम्नोऽभिवादयेत्॥ नाम्नां

स्वरूपमावो हि नो शब्दो ऋषिभिः स्मृतः॥८॥ ॥तत्र प्रयोगः॥ ॥अभिवादयाम्येतन्नामाहमस्मीभो
इति॥ आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादयेत्॥९॥ ॥अकारस्यास्य नाम्नोंते कार्यः पूर्वाक्ष
रं प्लुतं॥ आकारग्रहणं स्वरोपलक्षणार्थं॥१०॥ ॥तथा च वररुचिः॥ ॥आमंत्रितो स्वरो सस्प
प्लुवते संध्यक्षरस्यं परस्यं॥ आ३ई आ३ आ३उ नावं चिति॥११॥ ॥तथा च पाणिनिसूत्रं॥ ॥एचो
प्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्यादुताविति॥ तत्रैवं क्रमेण प्रत्यभिवादनप्रयो
गः॥ आयुष्मान्भव सौम्य पदू हत्ता३इ हरा३ई विष्णो॥ ॥मनुः॥ ॥अविद्वांसः प्रत्यभिवाद्नो
म्नोंते न प्लुतिं विदुः॥ कामं तेषु तु विप्रेषु स्त्रीष्वियायमहं वदेत्॥१३॥ यो न चेदभिवादस्य
विप्रः प्रत्यभिवादनं॥ नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः॥१४॥ ॥यमः॥ ॥अभि
वादयंतं यो विप्रो आशिषं न प्रयच्छति॥ स्मशाने जायते वृक्षो काकगृध्रोपसेवितः॥१५॥

47

न्हिक॥

॥४६॥

॥शातातपः॥ ॥उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भघातिनीं। अहोभिवाद्य द्विजो मोहादहो-
रात्रेण शुध्यति ॥१६॥ ॥पाषंडं पतितं व्रात्यं महापातकिनं षठं। सोपानत्कं कृतघ्नं च नाभिवादे-
त्कदाचन ॥१७॥ धावंतं च प्रपन्नं च मूत्रोच्चारकृतं तथा॥ भुंजानं माचमनार्हं च नास्तिकं ना-
भिवादयेत् ॥१८॥ वमंतं जृंभमाणं च कुर्वंतं दंतधावनं॥ अभ्यौंशिरसं चैव स्नातं नैवाभि-
वादयेत् ॥१९॥ ॥बृहस्पतिः॥ ॥जपयज्ञगणस्थं च समित्पुष्पकुशानलान्। उदपात्रा-
ग्निभैक्ष्याज्यं च वहंतं नाभिवादयेत् ॥२०॥ ॥शंखः॥ ॥एतदभिवाद्येपिष्टव्यमभिवाद्याच्छं
द्विजोत्तमैः॥ ॥जमदग्निः॥ ॥देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदंडिनं ॥ नमस्कारं न कुर्या-
च्चेत्प्रायश्चित्ती भवेन्नरः॥ ॥२२॥ ॥मनुः॥ ॥अभिवादनशीलस्य नित्यं वृद्धोपसेविनः॥ ॥४६॥
चत्वारि तस्य वर्द्धंते आयुः प्रज्ञा यशो बलं ॥२३॥ ॥इति श्री उपाध्याय नागदेवविरचितेभा

मारशीषेऽग्निग्राहनविधिः॥ अथप्रातर्होमविधिः॥ ॥संध्याकर्मावसानेतुस्वयंहोमोविधी
यते॥स्वयंहोमेफलंयत्स्यात्तदन्येननलभ्यते॥१॥होमेयत्फलमुद्दिष्टंजुहुतःस्वयमेवतु॥हू
यमानेतदन्येनफलार्धमुपलिप्यते॥२॥ऋत्विक्पुत्रोगुरुर्भ्राताभागिनेयोथविट्पतिः॥एतै
रपिहुतंयत्स्यात्तद्धुतंस्वयमेवतु॥३॥विट्पतिर्जामाता॥ ॥तथाचस्मृतिः॥ ॥अन्यैःशाल
कुलाद्धोमादेकःशिष्यकृतोवरं॥शिष्यैःशालकुलाद्धोमादेकोप्याहुतोवरं॥४॥ ॥कात्या
यनः॥ ॥असमक्षंतुदंपत्योःहोतव्यंनार्त्विगादिना॥द्वयोरप्यसमक्षंतुभवेद्धुतम
नर्थकं॥५॥निक्षिप्याग्निंस्वदारेषुपरिकल्प्यार्त्विजंतथा॥प्रवसेत्कार्यवान्विप्रोवृथैवे
वनचिरंवसेत्॥६॥यावन्नोपैतिस्तोहिसंतावत्सायंतुहूयते॥प्रातःसूर्योदयात्पू
र्वंप्राप्यच्छिन्नमतःपरं॥७॥पूर्णमासात्ययेहव्यंहोतव्यंपरहस्तनेयेत्॥तदहर्जुहुया

कः॥

४७॥

देवममायास्यात्तथैवक्रिया॥ ८॥ ॥मरीचिः॥ ॥सायंप्रातःपक्वेष्वन्नयासाग्निःप्रक्रायते॥ त
थान्यास्वपिचापत्सुपक्वाहोमोविधीयते॥ ९॥ अनातुरोप्रवासीचानिक्षितोनिरूपद्र
वः॥ पक्वहोमंतुयोस्यात्सचरेत्पतितव्रतं॥ १०॥ पक्वहोमंप्रकुर्वीतप्रवसन्नग्निमा
न्यदि॥ पंचयज्ञविधानंतुलौकिकाग्नौविधीयते॥ ११॥ परेणाग्नौहुतेस्वार्थेपरस्या
ग्नौहुतेस्वयं॥ पितृयज्ञात्ययाद्वैववैश्वदेवद्वयस्यच॥ १२॥ अनिष्ट्वानवयज्ञंचन
धान्नमापूर्नंतथा॥ दृष्टिंवैश्वानरींकुर्यादेकाग्नेस्तुचरुस्मृतः॥ १३॥ पक्वहोमंतुयोदत्वा
गत्वाकस्मान्निवर्तितः॥ होमंपुनःप्रकुर्यात्तुनचासोदोषमाभूनयेत्॥ १४॥ प्रवासिनोग्निहो
त्रीयस्त्रीपंचाहश्चसमवा॥ होतव्योहोमएकाहेसायंप्रातःपृथक्पृथक्॥ १५॥ ॥कात्याय ॥४
नः॥ ॥पक्वमोदनसक्त्वादितंडुलादिकृताकृतं॥ व्रीह्यादिचाकृतंप्रोक्तमितिद्रव्यंत्रिधाबु

५३

धेः॥१६॥ स्यसंनशात्॥ ॥हविष्यान्नंतिलामाषानीवाराव्रीहयोयवाः॥ इक्षवःशालयोमुद्गापयो
दधिघृतंमधु॥१७॥ हविष्येषुयवामुख्यास्तदनुव्रीहयस्मृताः॥ अलाभेव्रीहियवयोर्दध्नावाप
यसाथवा॥१८॥ यथोक्तवस्तुसंपत्तौग्राह्यंतदनुसारियत्॥ यवानामिगोधूमाव्रीहिणामिवशा
लयः॥१९॥ ॥बृहस्पतिः॥ ॥प्रसृधान्यचतुःषष्टिराकुलेःपरिकीर्तितं॥ तिलानांतुतर्धंस्यात
दर्धंस्याद्घृतस्यतु॥२०॥ ॥बौधायनः॥ ॥व्रीहिणांयवानांवाशतमाहुतिरिष्यते॥ ॥तत्राय
क्रमः॥ ॥आदौप्राणायामत्रयंकृत्वाॐतत्सतपरमेश्वरप्रीतयेप्राप्तहोममहंकरिष्ये॥ तत्रस
र्वप्रजापतिंअमुकद्रव्येणाहंहोष्ये॥ उपयमनकुशानादायतिष्ठत्समिधोऽभ्याधायपर्युक्ष्य
पुष्पादिनाभ्यर्च्यजुहुयात्॥ ॐसूर्यायस्वाहाइदंसूर्यायनमम॥ ॐप्रजापतयेस्वाहाइदंप्रजा
पतयेनमम॥ ततोविश्वादिस्पनुवाकजपंकृत्वाऋचाअतलपट्कुर्यात्॥ ततोग्निंदंपतीनमस्कु

५९

नृकृ॥

।४८।।

पीतां॥ ॥प्रजापतिः॥ ॥प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादि
ति श्रुतिः॥२१॥ ॥मरीचिः॥ ॥यद्ध्याद्देलनातुजं प्रातर्होमादनंतरं॥ स्थंडिले प्रतिमायां वा यत्नो
वाह्हद्येपि वा॥२२॥ ॥इति श्रीउपाध्यायनागदेवविरचिते आचारदीपे प्रातर्होमविधिः॥ अथ
नित्यदानविधिः॥ ॥तत्र याज्ञवल्क्यः॥ ॥दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः॥ याचितेस्त्वा
पि दातव्यं श्रद्धापूतं तु सर्वतः॥१॥ गोभूतिलहिरण्यादि पात्रे दातव्यमर्चिते॥ नापात्रे विदुषा किं
चिदात्मनः श्रेय इच्छता॥२॥ न विद्यया केवलया तपसा चापि पात्रता॥ यत्र वृत्तमिमे चोभे तद्धि पा
त्रं प्रकीर्तितं॥३॥ सर्वस्य प्रजयो विप्राः श्रुताध्ययनशालिनः॥ तेभ्यः क्रियापराः श्रेष्ठास्तेभ्यो
ऽप्यध्यात्मवित्तमाः॥४॥ तत्र तावत्प्राणायामत्रयं कृत्वा कालज्ञानपूर्वकं संकल्पं विधाय दानं ॥४८॥
दद्यात्॥ ॥तद्यथा॥ ॥शिवा आपः संतु सौमनस्यमस्तु अक्षतं चारिष्टं चास्तु पक्षेपस्तस्तु

यस्यापंतहूरेषलिहलमस्त्वितिपठित्वेमंमंत्रमुच्चरेत्॥हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः॥
अनंतपुण्यफलभदमतःशांतिंप्रयछमे॥५॥अमुकगोत्रःअमुकप्रवरःअमुकशर्मा
काश्यपगोत्रायकाश्यपावत्सारनैध्रुवेतित्रिःप्रवरायपस्मैकस्मैचिद्ब्राह्मणायेदंहिरण्यं
निष्क्रयंतुभ्यमहंसंप्रददे॥ ॥याज्ञवल्क्यः॥ ॥हेमश्रृंगैःशफैःरौप्यैःसुशीलावस्त्रसंयुता॥
सकांस्यपात्रादातव्याक्षिरिणीगौःसदक्षिणा॥६॥गवामंगेषुतिष्ठंतिभुवनानिचतुर्दश॥
यस्मात्तस्माच्छिवंमेस्यादिहलोकेपरत्रच॥७॥ ॥गोदानमंत्रः॥ ॥दातास्याःस्वर्गमाप्नोतिव
त्सरान्रोमसंमितान्॥कपिलाचेत्तारयतिभूयःसप्ततमैतेकुलं॥८॥यथाकथंचिद्दत्ता
गांधेनुंवाधेनुमेववा॥अरोगामपरिक्लिष्टांदातास्वर्गेमहीयते॥९॥ ॥मनुः॥ ॥यथाचंद्र
मसोवृद्धिरहन्यहनिजायते॥तथाभूमिकृतंदानंसस्यंसस्यंप्रवर्द्धते॥१०॥इक्षुभिःसंत
तांभूमिंयवगोधूमशाद्वलां॥अक्षयान्लभतेलोकान्योददातिवसुंधरां॥११॥ ॥तत्रमं

50

आन्हिक॥

॥४९॥

त्रः॥ ब्रह्मांडपुराणे॥ ॥सर्वल्लताश्च या भूमिर्वराहेण समुद्धृता॥ अनंतसस्यफलदा अतः
शांतिं प्रयच्छतु॥१२॥ स्वदत्तां परदत्तां वा यो हरेच्च वसुंधरां॥ षष्टिर्वर्षसहस्राणि विष्ठायां
जायते कृमिः॥१३॥ ॥मनुः॥ ॥तिलान्ददाति संस्तौति तिलानत्ति जुहोति च॥ तिलान्स्य
शांति यः स्नाति सर्वं तरति दुष्कृतं॥१४॥ ॥तत्र मंत्रो माघमासकल्पे॥ ॥तिलाः पापहरा नि
त्यं विष्णोर्देहसमुद्भवाः॥ सुवर्णेहरदेहत्वमतः शांतिं प्रयच्छतु॥१५॥ ॥तिलपात्रदानमं
त्रः॥ ॥संवर्त्तः॥ ॥सुखवासं तु यो दद्याद्धीनवातविवर्जितं॥ कल्याणी सुभगो वाग्मी सु
खी चैव स भवेत्॥१६॥ ॥गृहस्थमाछदैर्धान्यैर्नवर्णैर्येन कल्पितं॥ स्नानाद्दाना
द्रूपाद्धेमात्तेन षष्ठांशमाहरेत्॥१७॥ ॥तत्र मंत्रो ब्रह्मांडपुराणे॥ ॥इदं गृहं गृहाण

॥४९॥

विप२

त्वं सर्वोपस्कारसंयुतं॥ तवैव प्रसादेन गच्छाम्यनिर्मलं फलं॥१८॥ ॥गृहदानं॥ ॥
कामधेनोः समुद्भूतं सर्वक्रतुषु संस्थितं॥ देवानामाज्यमाहारमतः शांतिं प्रय

धनु॥१९॥ अन्नदानमंत्रः॥ याज्ञवल्क्यः॥ ॥भूदीपांश्चान्नवस्त्रांभस्तिलसर्पिप्रति
श्रयान्॥ नैवेशिकं स्वर्णधुर्यं दत्वा स्वर्गे महीयते॥२०॥ गृहं धान्यासनोपानच्छ
त्रमाल्यानुलेपनं॥ यानेवृक्षंप्रियांशय्यांदत्वात्यंतंसुखीभवेत्॥२१॥ ॥पराश
रः॥ ॥तपःपरंकृतयुगेत्रेतायांज्ञानमुच्यते॥ द्वापरेयज्ञमित्याहुर्दानमेकंकलौयु
गे॥२२॥ ॥सौरपुराणात्॥ ॥नदानात्साधनंकिंचिद्दृश्यतेभुवनत्रये॥ दानेनप्राप्य
तेस्वर्गःश्रीर्दानेनैवलभ्यते॥२३॥ ॥पुराणसमुच्चये॥ ॥व्यवसायस्थलिह्रालंकर्मणा
चोपपादितं॥ तद्धनंऋणमित्युक्तंइहलोकेपरत्रच॥२४॥ प्रतिश्रुताप्रदानेनदत्तापहरणेन
च॥ जन्मप्रभृतियत्पुण्यं तत्क्षणादेवनश्यति॥२५॥ आशाकारमदातारंदातुर्यःप्रति
बंधकः॥ दत्वानुतप्यतेपश्चात्तमाहुर्ब्रह्मघातकं॥२६॥ सप्तपूर्वान्निहोमंस्यावर्त्तेमानांस्तु
सप्तच॥ अज्ञानात्सप्तवैहन्यादप्रयच्छन्प्रतिश्रुतं॥२७॥ ॥इतिश्रीउपाध्यायनागदेववि

51

आह्निक ॥

॥५०॥

रचिते आचारदीपे नित्यस्नानविधिः ॥ अथ मंगलावेक्षणविधिः ॥ ॥ तत्र दक्षः ॥ ॥ दैवकार्यमतः कु
र्याद्विप्रो मंगलवीक्षणमिति ॥ ॥ वामनपुराणात् ॥ ॥ होमं च कृत्वालभनं शुभानां ततो बहिर्निर्गमनं
प्रशस्तं ॥ दूर्वां च सर्पिर्दधिसोदकं च धेनुं सवत्सां वृषभं सुवर्णं ॥१॥ मृद्गोमयं स्वस्तिकमक्षतां
लाजं मधु ब्राह्मणकन्यकाश्च ॥ श्वेतानि पुष्पाणि तथा समिद्धहुताशनं चंदनमर्कबिंबं ॥२॥
अश्वत्थवृक्षं च समालभेत ततश्च कुर्यान्निजजातिधर्मान् ॥३॥ ॥ पुराणेपि ॥ ॥ रोच
नां चंदनं हेम मृदंगं दर्पणं मणिन् ॥ गुरूनग्निं च सूर्यं च प्रातः पश्येत्सदा बुधः ॥४॥ ॥ का
श्यपः ॥ ॥ पापिष्ठं दुर्भगां मत्तं नग्नमुत्कृत्तनासिकं ॥ प्रातरुत्थाय यः पश्येदापद्भ्यः सप्र
मुच्यति ॥६॥ ॥ नारदः ॥ ॥ लोकेस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः ॥ हिरण्यं सर्पि
रादित्य आपो राजा तथाष्टमः ॥७॥ श्रो॰त्रियं सुभगां गामग्निमग्निमंतं तथा गुरुं ॥ प्रातरु ॥५०॥
त्थाय यः पश्येत्तत्काल उपलक्षणं ॥८॥ एतानि सततं पश्येन्नमस्येदर्चयेद्बुधः ॥ प्रद

क्षिणंचकुर्वीतयथास्यायुर्नहीयते॥९॥ ॥इतिश्रीउपाध्यायनागदेवविरचिते आचा
रदीपेमंगल्यावेक्षणविधिः॥ अथाध्ययनविधिः॥ ॥तत्रदक्षः॥ ॥अन्होद्वितीयभा
गेतुवेदाभ्यासोविधीयते॥वेदस्वीकरणंपूर्वंविचारोभ्यसनंजपः॥१॥तद्दानंचैवशि
ष्येभ्योवेदाभ्यासोहिपंचधा॥ ॥तत्रादौआर्षादिकंकथ्यते॥ ॥ऋग्वेदस्याग्निऋषिःगायत्री
छंदःअग्निर्देवताअध्ययनेविनि०॥यजुर्वेदस्यवायुऋषिःत्रिष्टुप्छंदःवायुर्देवताऽध्यय
नेवि०॥सामवेदस्यादित्यऋषिःजगतीछंदःआदित्योदेवताऽध्ययनेवि०॥ ॥योगी॥ ॥
गुरुंचैवाप्युपासीतस्वाध्यायार्थंसमाहितः॥आहूतश्चाप्यधीयीतलब्धंचास्मैनिवेदये
त्॥२॥हितंचास्यचरेन्नित्यंमनोवाक्कायकर्मभिः॥वर्जयेन्मधुमांसादिसर्वैर्नोगावि
वर्जितः॥३॥दंडाजिनोपवीतंचमेखलांचैवधारयेत्॥ब्राह्मणेषुचरेद्भैक्ष्यमनिंद्ये
ष्वात्मवृत्तये॥४॥आदिमध्यावसानेषुभवच्छब्दोपलक्षितः॥ब्राह्मणःक्षत्रिय

ह्निक॥

॥५१॥

धिरानैष्ठ चर्यायथाक्रमं॥५॥ ॥पाणिनिः॥ ॥हस्तेनवेदंयोधीतेस्वरवर्णार्थ
संयुतं॥ ऋग्यजुःसामभिःपूतोब्रह्मलोकेमहीयते॥६॥हस्तहीनंतुयोधीतेस्व
रवर्णार्थवर्जितं॥ ऋग्यजुःसामभिर्दग्धोवियोनिमधिगच्छति॥७॥ ॥इति
वेदस्वीकारः॥ ॥पराशरः॥ ॥ज्ञातव्यःसर्वथैवार्थोवेदानांकर्मसिद्धये॥पा
ठमात्रावसायंचपंकेगौरिवसीदति॥८॥ ॥व्यासः॥ ॥वेदस्याध्ययनंस
र्वधर्मेभ्यस्तस्माच्चैवयत्नतः॥अज्ञानतोर्थंनतस्सर्वंतुपाषाणंकठिनंयथा॥९॥ ॥
इतिविचारः॥ ॥मनुः॥ ॥योनधीत्यद्विजोवेदानन्यत्रकुरुतेश्रमं॥सजीवं ॥५१॥
न्नेवशूद्रत्वमाशुगच्छतिसान्वयः॥१०॥ ॥योगी॥ ॥यज्ञानांतपसांचैव
शुभानांसर्वकर्मणां॥वेदएवद्विजातीनांनिःश्रेयसकरःपरः॥१[illegible]॥स

नम

व्यासः॥ ॥यं यं क्रतुमधीयीत तस्य तस्याप्नुयात्फलं॥ त्रिवित्तपूर्णपृथिवीदानम् फलम
श्नुते॥१२॥ ॥डूलिङपः॥ ॥लिंगपुराणे॥ ॥यथैव वह्निसंयोगान्मलं त्यजति कांचनं॥ तथै
व गुरुसंपर्कात्पापं त्यजति मानवः॥१३॥ ॥मनुः॥ ॥गुरोरनुमतिं कृत्वा वेदाध्ययनमार
भेत्॥ अध्यापयेत्ततः शिष्यान्न्यायशीलगुणान्वितान्॥१४॥ ॥याज्ञवल्क्यः॥ ॥कृत
ज्ञोद्रोही मेधावी शुचिकल्यानसूयकाः॥ अध्याप्याधर्मतः साधुशक्ताप्तज्ञानवि
त्तकाः॥१५॥ न शिरस्ताडनं कुर्यात्पुत्रं शिष्यं तु ताडयेत्॥ अधोभागे शरीरस्य नो
त्तमांगे न वक्षसि॥१६॥ अथान्यथा तु प्रहरेत्स पापयुक्तो भवेन्नरः॥ सर्वधर्मम
यं ब्रह्मदानेभ्योऽप्यधिकं यतः॥ तद्ददत्समवाप्नोति ब्रह्मलोकमविच्युतं॥
॥१७॥ ॥उशनाः॥ ॥अयने विषुवे चैव शयने बोधने तथा॥ अनध्या

३४

पंचकुर्वीतमन्वादिषुयुगादिषु॥१८॥ ॥याज्ञवल्क्यः॥ ॥त्र्यहंप्रेतेष्वनध्या
यःशिष्यर्त्विक्गुरुबंधुषु॥उपाकर्मणिचोत्सर्गेस्वशाखाश्रोत्रियेतथा॥१९॥
संध्यानिर्जितनिर्घातभूकंपोल्कानिपातने॥सम[illegible]माप्यवेदमु
पनिषदारण्यकमधीत्यच॥२०॥पंचदश्यांचतुर्दश्यामष्टम्यांराहुसूत
के॥ऋतुसंधिषुभुक्त्वावाश्राद्धिकंप्रतिगृह्यच॥२१॥पशुमंडूकनकु
लमार्जारमूषकाहिकैः॥कृतेंतरेत्वहोरात्रंशक्रपातेतथोच्छ्रये॥२२॥
श्वक्रोष्टुगर्दभोलूकश्वाहिसोमार्कनिस्वने॥अमेध्यशवशूद्रांत्य
श्मशानपतितांतिके॥२३॥पांसुवर्षेदिशांदाहेसंध्यानिहारभीतिषुधावतः

फ्रुतिगंधेच त्रिष्टेचगृहमागते ॥२४॥ देशेषु चावांत्मनि च विद्युत्स्तनितसंप्लवे ॥ उल्काई पाणिरंतो
तरर्धमात्रेति मारुते ॥२५॥ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणारोहिणी । सप्तत्रिंशादनध्यायाएतांस्ता
त्कालिकान्विदुः ॥२६॥ ॥ब्रह्मांडपुराणे॥ ॥रात्रौयामद्वयादर्वाकूपदिपस्येत्रयोदशी ॥ प्रदोषःसतु
विज्ञेयः सर्वशास्त्रविवर्जितः ॥२७॥ षष्ठी च द्वादशी चैव अर्धरात्रोननाडिका ॥ प्रदोषमनधीयी
तत्तृतीयानवनाडिका ॥२८॥ वेदाभ्यासरतंक्षांतं महायज्ञक्रियापरं ॥ नस्पृशंतीह पापानि
महापातकजान्यपि ॥२९॥ ॥इतिश्री उपाध्यायनागदेवविरचिते आचारदीपे अध्ययन
विधिः ॥ ॥अथयोगक्षेमविधिः ॥ ॥तत्रदक्षः ॥ ॥तृतीयेचतथाभागे पोषवर्गार्थसाधनं ॥
॥याज्ञवल्क्यः ॥ ॥उपेयादीश्वरंचैवयोगक्षेमार्थसिद्धये ॥ नस्वाध्यायविरोध्यार्थमीहेत
नयतस्ततः ॥१॥ ॥मनुः ॥ ॥यात्रायामात्रसिध्यर्थंस्वैःकर्मभिरगर्हितैः ॥ अक्लेशेनशरीर

क॥

ण्प२

॥५३॥ स्य कुर्वीत धनसंचयं ॥२॥ सप्तवित्तागमा धर्म्या दायो लाभः क्रयो जयः ॥ प्रयोगः कर्मयोगश्च सत्प्रतिग्र
एवच ॥३॥ अध्यापनाध्ययनं यजनं याजनं तथा ॥ दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥४॥ षण्णां
तु कर्मणामस्य त्रीणि कर्माणि जीविका ॥ याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ॥५॥ ॥याज्ञ
६४ वल्क्यः ॥ ॥ प्रधानं क्षत्रिये यस्य प्रजानां पीठे परिपालनं ॥ कुसी [illegible] कृषिवाणिज्यं पशुपाल्यं वि
शः स्मृतं ॥६॥ ॥मनुः॥ ॥ऋतामृताभ्यां जीवेत मृतेन प्रमृतेन वा ॥ सत्यानृताभ्यामपि वा ना
श्ववृत्त्या कदाचन ॥७॥ ऋतमुंछशिलं ज्ञेयममृतं स्यादयाचितं ॥ मृतं तु याचितं भैक्ष्यं प्र
मृतं कर्षणं स्मृतं ॥८॥ सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते ॥ सेवा श्ववृत्तिराख्याता तस्मा ॥५
त्तां परिवर्जयेत् ॥९॥ ॥याज्ञवल्क्यः॥ ॥कुसीधकुंभी-धान्यो वा त्र्याहिको श्वस्तनोपि वा ॥
जीवेद्वापि शिलोंछेन श्रेयानेषां परः परः ॥१०॥ ॥पराशरः॥ ॥अतः परं गृहस्थस्य कर्म

चारं कलौ युगे ॥ संप्रवक्ष्याम्यहं पुण्यं पराशरप्रचोदितं ॥११॥ षट्कर्मसहितो विप्रो कृषिकर्म समाच
रेत् ॥ स्वयं कृष्टे तथा क्षेत्रे धान्यैश्च स्वयमर्जितैः ॥१२॥ निर्वपेत्पंचयज्ञांश्च क्रतुदीक्षां च कारये
त् ॥ अष्टागवं धर्महलं षड्गवं जीवितार्थिनां ॥१३॥ चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनां ॥ ॥
पराशरः ॥ ॥ हीनांगं व्याधितं क्लीबं वृद्धं विप्रो न वाहयेत् ॥ वाहयेद्दिवसस्यार्धं पश्चात्स्नानं स
माचरेत् ॥१४॥ ॥ कूर्मपुराणे ॥ ॥ देवेभ्यश्च ततो दद्यात्कोमाद्भागं तु विंशकं ॥ त्रिंशद्भागं तु विप्रेभ्यो
कृषिं कृत्वा न दोषभाक् ॥१५॥ ॥ पराशरः ॥ ॥ यो न दद्याद्द्विजातिभ्यो राशिमूलमुपागतान् ॥
स चौरः स च पापिष्ठो ब्रह्मघ्नं तं विनिर्दिशेत् ॥१६॥ ॥ मनुः ॥ ॥ वरं स्वधर्मो विगुणो न पार
क्यः स्वनुष्ठितः ॥ परधर्मेण जीवन्हि सद्यः पतति जातितः ॥१७॥ संतोषं परमास्थाय सु
खार्थी संयतो भवेत् ॥ संतोषमूलं हि सुखं दुःखमूलं विपर्ययः ॥१८॥ ॥ व्यासः ॥ ॥ छ ॥(

नि॰श॰

।।५४।। संतुष्टः कोन राज्ञोऽलि फलैर्मूलैश्च वर्जितुं ।। सर्वेस्त्विंद्रियलौल्येन संकटान्यवगाहते ।।१८।।
दरिद्रोर्थैस्तनोराज्यंलपेंद्रत्वंवलोक्षयं ।। पदंवांछंतिनांतोस्तिलस्मात्सक्षांपरिहृत्यडोलत ।।१९।।
।।पमः।। ।।परस्त्रपाचनकोनि संनसः स्वर्गस्यनाङ्कनं ।। उद्वेजयति भूतानियथाचौरस्तथैव
सः।।२०।। ।।व्यासः।। ।।विघमानेधनेयस्तुप्रतिग्रहरुचिर्द्विजः।। नरकंघोरवंप्राप्यलत्रैवपरिप्य
च्यते।।२१।। ।।चतुर्विंशतिमतात्।। ।।स्त्रीद्रंश्रेष्ठप्रतिग्रहीपापद्म्रालएभ्यस्तनोन्नपानू ।।नतस्त
थैवपश्चद्रेभ्यःशांस्वस्त्ववचनेपथा।।२४।। ।।पाद्मवल्म्यः।। ।।राज्ञोनवासियाज्येभ्यःसीदंन्निर्वेद्वनंबुधः।।
रंस्त्रीहेतुकपाषंडीबकवृत्तीश्चवज्यपि ।।२५।। नराज्ञःप्रतिग्रहीपानूलुब्धःस्यात्वाकबर्ज्जिलान्।।प ।।५४।।
तिग्रहेभूनिचक्रीध्वजीकैरपानराधिपः।।कुर्याद्दूरात्युएंपर्वाल्सर्वानेतेयथाक्रमं।।२६।। ।।पमः।।
तथैवराज्ञोमाहिषीराजमात्यपुरोहिताः।।पापेनाभैनसंयुक्ताःसर्वेनेराजधर्मिणः।।२७।। ।।याज्ञवल्क्यः।। ।।

द्यातपोभ्यां हीनेन न तु ग्राह्यो प्रतिग्रहः ॥ गृह्णन्प्रदातारमधो नयत्यात्मानमेव च ॥ १९ ॥ ॥ देवलः ॥ ॥
याजनं योनिसंबंधं स्वाध्यायं सहभोजनं ॥ कृत्वा सद्यः पतत्येव पतितेन न संशयः ॥ २० ॥ ॥ उशना ॥ ॥
पतिताद्द्रव्यमादाय भुंक्ते चेद्ब्राह्मणो यदा ॥ कृत्वा तस्य समुत्सर्गमतिकृच्छ्रं चरेद्द्विजः ॥ २१ ॥ ॥ याज्ञवल्क्यः ॥ ॥
अयाचिताहृतं ग्राह्यमपि दुःकृतकर्मणः ॥ अन्यत्र कुलटाषंढपतितेभ्यस्तथा द्विषः ॥ २२ ॥ ॥ मनुः ॥ ॥ शय्यां गृ-
हं कुशानेधौनपः पुष्पं महीं दधि ॥ धानामाषाः पयोमांसं शाकं चैव न निर्णुदेत् ॥ २३ ॥ ॥ यमः ॥ ॥ चिकि-
त्सकस्य मृगयोर्वैश्यायाः कितवस्य च ॥ षंढश्रूनिकयोरेव मुघ्नानामपि वर्जयेत् ॥ २४ ॥ ॥ याज्ञवल्क्यः ॥ ॥
प्रतिग्रहसमर्थोपि नादत्ते यः प्रतिग्रहेन् ॥ ये लोका दानशीलानां स तानाप्नोति पुष्कलान् ॥ २५ ॥ ॥ इति
प्रतिग्राहकाधिकारनिरूपणं ॥ ॥ अथापद्वृत्तयः ॥ ॥ बृहस्पतिः ॥ ॥ अजीवन्स्वकर्मणास्येन विप्रः क्षा-
त्रं समाश्रयेत् ॥ वैश्यकर्माथ कुर्वीत न त्वेवालान्नेपरः परं ॥ कृषेरक्षावे वाणिज्यं तदन्नावे कुसीदकं ॥ २६ ॥ कु-
सीदं द्व्यर्थधनप्रयोगः ॥ ॥ यमः ॥ ॥ समर्घं पण्यमादाय महर्घं यः प्रयच्छति ॥ स वै वार्द्धुषिको नाम प

न्हक॥

॥५५॥ ष्यवृद्ध्या प्रयोजयेत्॥३८॥ ॥मनुः॥ ॥ब्राह्मणः क्षत्रियो वापि वृद्धिं नैव प्रयोजयेत्॥ कामं तु खलु धर्मार्थं दद्या
त्पापीयसेऽल्पिकां॥३९॥ ॥याज्ञवल्क्यः॥ ॥=आशीतिभागो वृद्धिं स्यान्मासि मासि सबंधके॥ वर्णक्रमाच्छ
तं द्वित्रिचतुःपंचकमन्यथा॥४०॥ कांतारगास्तु दशकं सामुद्रा विंशकं शतं॥ दद्युर्वा स्वकृतां वृद्धिं सर्वे
सर्वासु जातिषु॥४१॥ हीनजौंनैर्जातिपरिक्षीणमृणार्थं कर्म कारयेत्॥ ब्राह्मणस्तु परिक्षीणः श
नैर्दाप्यो यथोदयं॥४२॥ फलोपलक्षौमसोममनुष्यापूपवीरुधः॥ तिलौदनरसक्षारं दधिक्षीरं घृ
तं जलं॥४३॥ शस्त्रासवमधूच्छिष्टमधुलाक्षाश्च बर्हिषः॥ मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितिः॥४४॥
कौशेयनीललवणमांसैकशफसीसकं॥ शाकार्द्रौषधिपिण्याकपशुगंधांस्तथैव च॥४५॥ वैश्यवृ
त्त्यापि जीवन्नो विक्रीणीत कदाचन॥४६॥ ॥यमः॥ ॥स्नेहद्रव्यरसानां च सत्त्वानां जीवतामपि॥ विक्रेता
दानपुण्यानां प्रोच्यते भ्रूणहा बुधैः॥४७॥ गवां विक्रयकारी तु गवां रोमाणि यानि तु॥ तावद्वर्षसहस्रा
णि गवां गोष्ठे क्रिमिर्भवेत्॥४८॥ भोजनार्थं जनाद्यानान्न्यक्कुरुते तु यः॥ क्रिमिर्भूत्वाथ विष्टा ॥५

यां पितृभिः सह मज्जति ॥४९॥ रसा रसैर्निमातव्या न त्वेव लवणं रसैः ॥ कृतान्नं चाकृतान्नेन तिला
धान्यं न तत्समं ॥५०॥ ॥ अंगिराः ॥ ॥ व्याधितस्य दरिद्रस्य कुटुंबात्संचकृतस्य च ॥ अधानं चापद्द
त्तस्य भिक्षाचर्यं विधीयते ॥५१॥ ॥ मनुः ॥ ॥ तथैव सप्तमे भक्ते नकालिषडनस्तथा ॥ अश्वस्त
नविधानेन हर्तव्यं हीनकर्मणः ॥५२॥ धान्यमिति विशेषः ॥ ॥ यानस्य संफलं म् देदर्पयेत
थेव च ॥ एवं यज्ञोपयोग्रासार्थं नस्तेयमनुरब्रवीत् ॥५३॥ ॥ व्यासः ॥ ॥ प्रतिग्रहरुचिर्न स्याद्या
गार्थं तु समाहरेत् ॥ स्थित्यर्थादधिकं गृह्णन् ब्राह्मणो यात्यधोगतिं ॥५४॥ ॥ इति श्रीउपाध्या
यनागदेवविरचिते आचारदीपे योगक्षेमविधिः ॥ ॥ अथ माध्याह्नस्नानविधिः ॥ ॥ तत्र
दक्षः ॥ ॥ चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् ॥ तिलपुष्पकुशादीनि स्नानं चाकृत्रिमे जले ॥१॥ ॥ व्या
सः ॥ ॥ स्नानं मध्यंदिने कुर्यात् सुजीर्णेति निरामयः ॥ न तु कालं क्षतो भोगा नाह्रातो नासिनाकुले ॥२॥
॥ योगी ॥ ॥ प्रशस्ते विद्यमाने तु उदके सुमनोहरे ॥ नाल्पोदके द्विजः स्नायान्नदीचोत्सृष्टके त्रिमे ॥२॥

57

न्हिक॥

॥५६॥

=आयुर्वेदात्॥ ॥स्नानमर्दितनेत्रस्यकर्णरोगातिसारिषु॥ आध्मातपीनसाजीर्णभुक्तवत्सुरगर्हितं॥४॥
॥व्यासः॥ ॥मंत्रपूतैर्जलैः स्नानं प्राकुर्त्तीर्थफलप्रदं॥ नत्र्यपाचारमग्नानां पादस्नामिथतत्समं॥५॥
॥योगी॥ ॥अथस्नानविधिं कृत्स्नं प्रवक्ष्याम्यनुपूर्वशः॥ येनस्नानादिवंयांतिश्रद्धानाद्विजो

नि०४ त्तमाः॥६॥ मृद्गोमयंदर्भपुष्पाणीसुरभीणिच॥ आहरेत्स्नानकालेतुमध्याह्नेप्रयतः शुचिः॥७॥
गत्वोदकांतेविविक्तेस्थापयेत्तत्रपृथक्स्थितौ॥ द्विधाकृत्वामृदंतांतुगोमयंचविचक्षणः॥८॥रो
तालपः॥ ॥मृत्तिकांगोमयंचापिननिशायांसमाहरेत्॥ नगोमूत्रंप्रदोषेतुगृह्णीयाद्बुद्धिमान्न
रः॥९॥ ॥यम॥ ॥क्षालयेत्पङ्कमत्रंतुमद्भिरद्भिःशनैःशनैः॥ प्रक्षाल्यहस्तौपादौचशिखाबं
धनमाचरेत्॥१०॥ ॥भृगुः॥ ॥कायस्थमेवतत्स्नात्स्यमुत्तार्यनकदाचन॥ सहकृतारणा
त्तस्यप्रायश्चित्तीभवेद्द्विजः॥११॥ तुष्णीमेवावगाहेतयदिस्यादशुचिर्नरः॥ आचम्यपि ॥५
वेत्पश्चात्तत्रस्नानंसमाचरेत्॥१२॥ सपवित्रंकरंकृत्वाआचम्यप्राङ्मुखस्थितः॥ प्राणा

यामंत्रयंकुर्यात्स्कालज्ञानमतःपरं॥१३॥तत्रस्नानसंकल्पः॥ ॥सकलपापक्षयार्थंपरमेश्वरप्रीत
येमध्याह्नस्नानमहंकरिष्ये॥ ॥योगी॥ ॥यकृज्ञानातिलहेनआर्षंछंदश्चदैवतं॥विनियोगंब्रा
ह्मणंचमंत्रार्थज्ञानमेवच॥१४॥एकैकस्यसमंत्रस्यप्राप्यामुत्रसलोकतां॥दैवतायाश्चसायोज्यं
गच्छत्येवनसंशयः॥१५॥अविदित्वातुयोकुर्याद्याजनाध्ययनंतपः॥होममंतर्जलादीनितस्य
चाल्पंफलंन्नवेत्॥१६॥तत्रउरुंहीतिशुनःशेपस्त्रिष्टुब्वरुणोवार्युपस्थाने॥येतेशतमि
तिविश्वामित्रस्त्रिष्टुब्वरुणोमापावर्त्तने॥सुमित्रियादुर्मित्रियाइतिद्वयोर्ऋषीप्राजापत्येअब्दै
वत्येआदानप्रक्षेपयोः॥शश्वत्क्रांतघृतासीतिद्वयोरनुष्टुब्वामदेवोम्लिकाग्निमंत्रणग्रहण
योः॥इदंविष्णुरितिमेधातिथिर्गायत्रीविष्णुर्मार्जने॥आपोअस्मानितिहविर्धानस्त्रिष्टुबापो

ने

॥५७॥ मज्जनोऽस्मऽऊनयो॰॥ अयमग्रमिति विश्वामित्रो जगती गोमयोपलेपने॰॥ मानस्तोक इति कुत्सो जगती
रुद्रो गोमयमार्जने॰॥ इमंमेवरुणेति द्वयोर्वामदेवस्त्रिष्टुबग्निवरुणौ मार्जने॰॥ मापोधान्न इति द्वेपञ्जुषी
प्राजापत्ये त्रिष्टुब्वरुणो मार्जने॰॥ यदाहुरिति प्रजापतिर्गायत्री वरुणो मार्जने॰॥ उदुत्तममिति शुनः
शेपस्त्रिष्टुब्वरुणो मार्जने॰॥ मुंचंत्विति त्या पर्वतोऽनुष्टुब्बोषध्यो मार्जने॰॥ अवतेथेति प्रजापतिर्पंक्ति
यज्ञो मार्जने॰॥ कांडात्कांडादित्स्यकृद्वयमानुष्टुभं दूर्वेष्टका देवते मार्जने॰॥ अपाघमिति स्यानुष्टुम
मपामार्गमार्जने॰॥ कांडात्कांडादपाघमिति मंत्रद्वयं श्रवणाकर्मे विषपे॥ आपोहिष्ठेत्येतस्य सिं ॥५७
धुद्वीपस्त्रिष्टुबापो मार्जने॰॥ इदमापइति प्रजापतिरनुष्टुबापो पांक्ते पावमान मार्जने॰॥ हवि
ष्मतीरिति प्रजापतिरनुष्टुप्लिंगोक्तादेवता मार्जने॰॥ दिवीरापइति द्वयोः प्रजापतिःपंक्तिरापो

मार्जने०॥ कार्षिरितिप्रजापतिरनुष्टुबापोमार्जने०॥ अपोदेवाइतिवरुणस्त्रिष्टुबापोमार्जने०॥ द्रुपदादिवेतिप्रजा
पस्त्रिसरस्वत्यनुष्टुबापोमार्जने०॥ शंनोदेवीरितिसिंधुद्वीपोगायत्रीआपोमार्जने०॥ अपांरसमिति
बृहस्पतिअनुष्टुबापोमार्जने०॥ अपोदेवीरितिसिंधुद्वीपोबृहत्यापोमार्जने०॥ पुनंतुमेतिद्वयोःप्रजा
पतिरनुष्टुब्बृपितरोदेवतामार्जने०॥ अग्नआयूंषीतिवैश्वानरोगायत्र्यग्निर्मार्जने०॥ पुनंतुमेति
प्रजापस्त्रिसरस्वत्यनुष्टुब्लिंगोक्तादेवतामार्जने०॥ पवित्रेणेत्यादिचतुर्णांप्रजापस्त्रिसर
स्वत्यगायत्रीप्रथमद्वितीययोरग्निर्ब्रलावरुणोद्वितीयस्यतृतीयस्यवायुसोमौचतुर्थस्यसूर्यो
मार्जने०॥ येभ्यदेवीतिप्रजापस्त्रिसरस्वत्यास्त्रिष्टुप्विश्वेदेवामार्जने०॥ चित्पतिर्मेतिति
स्त्रयाणांयजुषांप्रजापतिःकश्यपोत्रिष्टुप्द्वयोःप्रजापतिःदेवोमेतिप्रजापतिरनुष्टुप्सवितामो

५७

न्हः॥
३८॥
च॰

डीनं०॥ ॥तथा योगी॥ ॥ऊरुद्वौ हस्तचातोयमुपस्थाप प्रदक्षिणं॥ आवर्तयेत्रिरुदकं षेलेरातमभिनिह्य
चा॥१७॥सुमित्रियाइसंजलिमुद्धरेद्देवतांस्मरन्॥ दुर्मित्रियाइतिद्वेष्यं ध्यायंश्चापः सेचयेत्॥१८॥
ततः पूर्वकल्पितमृद्भागत्रयेणांगक्षालनं॥ ॥तथा च योगी॥ ॥प्रथमो नमूध्यानामंशानां
क्षाल्ननं तु तैः॥ नागैः पथकू पथकू कुर्यात्क्षालनं मृदसंकरः॥१९॥ ॥वशिष्ठः॥ ॥मृदैकया
शिरः क्ष्याल्यं नाभ्यां नाभ्येस्तथोपरि॥ मृद्भिरद्भिश्च गात्राणि क्रमशस्त्वेवलेपयेत्॥२०॥
॥योगी॥ ॥कटिंवृस्त्युरुजंघे च चरणौ च त्रिभिस्त्रिभिः॥ तथा हस्तौ च आचम्यनमस्य ॥५०
तुजलं चलत्॥२१॥ ॥यमः॥ ॥अश्वक्रांतइतिस्नात्वा मंत्रेण मंत्र्य मृत्तिकां॥ उद्धरेदुद्धृ
तासीति मंत्रेण सुसमाहितः॥२२॥ ॥तौ मंत्रौ तत्र वशिष्ठः॥ ॥अश्वक्रांते रथक्रांते

विष्णुक्रांते वसुंधरे ॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं ॥ २३ ॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ मृ-
त्तिके हर मे पापं यद्दैवं यच्च मानुषं ॥ २४ ॥ अलाभे द्विमृदां गानिदूदं विष्णुरिति हृच्चा ॥ नास्फराभ्रिमुखो
मज्जेह पो अस्मानिति हृच्चा ॥ २५ ॥ उद्दिशाभ्यद्रस्फन्मज्यजुंब कायेति मज्जनं ॥ इत्वाचम्योत्तरं कर्मपथा-
पूर्वं समाचरेत् ॥ २६ ॥ ॥ विष्णुः ॥ ॥ अथ मथमिति स्मृत्वा मानस्तोके न वै पुनः ॥ मार्जयेत्क्रोम यं आपूःसो
द्रकं नानुदर्शितं ॥ २७ ॥ ॥ कूर्मपुराणे ॥ ॥ मृत्तिकानुसमुद्दिष्टालार्द्रामलकमात्रिका ॥ गोमयस्यप्रमा-
णं तत्तेनांगं लेपयेत्ततः ॥ २८ ॥ मृदा स्नानं न कुर्वीत रात्रौ संध्याग्रहेषु च ॥ विधिज्ञः स्नानकाले
तु तथान्नौ मार्कवारयोः ॥ २९ ॥ ॥ योगी ॥ ॥ तलोभ्रिषिंचेन्मंत्रैश्च वारुणैः स्रक्षयथाक्रमं ॥ इमंम्मेवरुणे
त्यृग्भ्यां तंत्वा सलत्वाइसपि ॥ ३० ॥ मापउद्रुतमसैमालमुंचंत्वव स्थेतिच ॥ अभिषिंच्येत्तथात्मानं नि-
मज्ज्याचम्य वै पुनः ॥ ३१ ॥ कांडद्वपादमिति होपुतक्कैश्रावणकर्मणि ॥ इत्नैः स्रूपाव येन्मंत्रैरब्लिंगैः पा

हक॰॥

१५९॥ वनैः श्रुनैः ॥२२॥ आपो हि ष्ठेति तिसृभिरिमा आपो हविष्मती ॥ देवीरापइति द्वाभ्यामपो देवा इति हृचा ॥२३॥
द्रुपदादिव इत्येकाशन्नो देवीरपां रसं ॥ अपो देवीः पवमानः पुनंत्वाधास्तुचोनव ॥२४॥ चित्पतिर्मे
तिचत्रिभिः पाव्यात्मानं समाहितः ॥ ॐकारेण व्याहृतिभिर्गायत्र्या च समाहितः ॥२५॥ आद्यावंते च
कुर्वीत मार्जनं तु यथाक्रमं ॥ ऊर्ध्व मध्ये स्थितश्चैव मार्जनं तु विधीयते ॥२६॥ ॥ कात्यायनः ॥ ॥ पुन
रिमं म इत्यृचे ॥ ॥ देवलः ॥ ॥ न नदीषु नदीं ब्रूयात्पर्वतेषु न पर्वतं ॥ नान्यत्र शंसेत्तत्रस्थस्तीर्थेष्वा
यतनेषु च ॥२७॥ ॥ तथा च योगी ॥ ॥ यत्र स्थानेषु यत्तीर्थं नदी पुण्यतमा च या ॥ तां ध्यायेन्मनसा वि
प्रो अन्यत्रस्थो विचिंतनं ॥२८॥ ॥ ब्रह्मांडपुराणे ॥ ॥ ब्रह्मादिभिरखरोद्भूते त्रिकंटकविराजिते ॥ ॥१५९
गोतमप्रार्थिते गंगे गृहाणार्घ्यं नमोस्तु ते ॥२९॥ ॥ अर्घ्यमंत्रः ॥ पुराणात् ॥ ॥ स्नानेऊर्ध्वं पवित्ररूपा
धनमेद्वमपांपतिं ॥ हरिमेवं स्मरन्बुध्या त्रिमज्जेद्घरवज्जले ॥३०॥ उन्मज्ज्याचम्य वै कुर्यात्त्रिषे

क्रमतंऽहितः ॥ इमं मेत्वष्टभिर्मंत्रैरष्टभिर्वीमनोऽहितान् ॥ ४१ ॥ ॥ मुनिं प्रजापतिः श्छंदो गायत्र्यग्निश्च दे
वता ॥ आयं गोरिति त्रिऋचस्य योगश्चावर्तनेन सा ॥ ४२ ॥ आयं गौरिति मंत्रैस्तु त्रिभिरावर्त्तयेज्ज
पं ॥ तत्र मज्जेत्स्मरन्विष्णुं सर्वपापप्रपापहं ॥ ४३ ॥ ॥ चतुर्विंशतिमत्वान् ॥ ॥ ततोंगुष्ठांगुलीभि
स्तु श्रोत्रदृङ्नासिकामुखं ॥ पिधायांतः प्रतिस्त्रोतास्त्रिर्मैंजपेदघमर्षणं ॥ ४४ ॥ ॥ यमः ॥ ॥ जपे
दृचं चतुष्पदांऽडुंबकां वा समाहितः ॥ अंतर्जले ततो विप्रो मंत्रानन्यांश्च वारुणान् ॥ ४५ ॥ ॥ हारि
तः ॥ ॥ ऽडुंबकानाम गायत्री वेदे वाजसनेयके ॥ सहस्रं तज्जले जप्त्वा ब्रह्महत्यां व्यपोहति ॥ ४६ ॥ ऋ
षिर्मुद्गिलश्छंदोऽन्यो गायत्री छंद उच्यते ॥ वरुणोऽस्या देवता च विनियोगोंतर्जले स्मृतः ॥ ४७ ॥ ॥ व्या
सः ॥ ॥ ऽदुपदानाम सा देवि वेदे वाजसनेयिके ॥ अंतर्जले सहस्रं जप्त्वा ब्रह्महत्यां व्यपोहति ॥ ४८ ॥
॥ यमः ॥ ॥ हत्वा लोकानपीमांस्त्रीन्स्त्रिः पठेदघमर्षणं ॥ यथाश्वमेधावभृथ एवं तन्मनुरब्रवीत् ॥ ४९ ॥

न्हि॰

द्दि०।। सव्याहृतिंसप्रणवांगायत्रींवाजपेदथ।।आवर्त्तयेद्वाप्रणवंस्मरेद्वाविष्णुमव्ययं।।५०।।।।व्यासः।।।।
यथोक्तेष्वोज्झितस्तेस्क्तमजो त्रिर्द्दंडवन्नतः।।उत्तीर्यपीडयेद्वस्त्रमाचामेच्चयथाविधि।।५१।।।।योगी।।।।
स्नात्वैवंवाससीधौतेअक्लिन्नेपरिधायच।।प्रक्षाल्योरूमृदाद्भिश्चहस्तौप्रक्षालयेत्ततः।।५२।।
योनेनविधिनास्नातियत्रयत्रजलाशये।।सतीर्थफलमाप्नोतितीर्थेतुद्विगुणंफलं।।५३।।।।स
सव्रतः।।।।बल्वंरूपंयशोधर्मंज्ञानमायुःसुखंधृतिं।।आरोग्यंपरमाप्नोतिसम्यक्स्नानेनमा
नवः।।५४।।।।विवस्वान्।।।।अविदित्वैवयःस्मार्त्तंविधानंस्नानमाचरेत्।।सयातिनरकं
घोरमितिव्यासवचःस्फुटं।।५५।।।।इतिश्रीउपाध्यायनागदेवविरचितेआचारदीपेमध्या।।द्दि
ह्नस्नानविधिः।।।।अथसंक्षेपस्नानविधिः।।।।तत्रयोगी।।।।यएषविस्तरेणोक्तःस्नान
स्यविधिरुत्तमः।।असामर्थ्यान्नकुर्याच्चेत्तत्रायंविधिरुच्यते।।१।।स्नानमंतर्जलेचैवमार्जना

चमनेतथा॥ ॐ कात्तिमंत्रएं चैवतीर्थस्य परिकल्पनं॥२॥ अघमर्षणं॥ [illegible] ॥ न
स्वरुः॥ स्नानाचरणमित्येतदुपदिष्टं महात्मभिः॥३॥ ॥ अथ सेपतर्पणं॥ ॥ आवा [illegible] गादिप
चेवत्॥ ॐ मोदाद्योदेवास्तृप्यंतामिति यज्ञोपवीती प्राङ्मुख एकमंजलिं दद्यात्॥ ॐ सन
कादयो मनुष्यास्तृप्यंतामिति निवीती उदङ्मुखो द्वे॥ ॐ कव्यवाडनलादयो दिव्यपितरस्तृ
प्यंतामिति प्राचीनावीती दक्षिणामुखस्त्रीन् तर्पणं ह्ये अस्मत्पितरस्तृप्यंतामिति च॥ पि
त्रुपुत्रये॥ ॥ आब्रह्मस्तंबपर्यंतं जगत्तृप्यमिति ब्रुवन्॥ अंजलित्रयं दद्यात् कुर्यात्सं
क्षेपतर्पणमिति॥८॥ ॥ इति संक्षेपस्नानविधिः॥ ॥ अथ मध्याह्नसंध्योपासनं॥
लदपि प्रातःसंध्योपासनवत्॥ संकल्पावाहनाचमनार्घ्योपस्थानजपनिवेदनेषु वि
शेषः॥ ॐ माध्याह्निकं संध्योपासनमहं करिष्ये इति संकल्पः॥ ॐ सावित्रीं युवतीं शुक्लां

॥ ६१ ॥

शुक्लवस्त्रां त्रिलोचनां ॥ त्रिशूलिनीं वृषारूढां शुक्लाभरणभूषितां ॥ रुद्राणीं रुद्रदैवत्यां रुद्रलोक
निवासिनीं ॥ कैलासविहितावासामायांतिं सूर्यमंडलात् ॥ वरदां अक्षसूत्रां साक्षाद्देवीमावाहया
म्यहं ॥ इत्यावाहने विशेषः ॥ =आपः पुनंत्विति लिकस्य प० आपो० अनु० आचमने वि० ॥ ॐ आपः पुनं
तु पृथिवीं पृथिवी पूता पुनातु मां ॥ पुनंतु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु मां ॥ यदुच्छिष्टमभोज्यं
च यद्वा दुश्चरितं मम ॥ सर्वं पुनंतु मामापोसतां च प्रतिग्रहं स्वाहा ॥ इत्याचमने ॥ सावित्र्यभि
मुखे नैवेद्येनांजलिनार्घ्यं दद्यात् ॥ उपस्थानमंत्रान्प्रवक्ष्याम्यहं योगी ॥ एतान्जपेदूर्ध्वबाहुः सू
र्यमीक्षन्समाहितः ॥ इत्युपस्थानं ॥ ततो यथाशक्ति गायत्रीजपः ॥ ॥ तदाह योगी ॥ ॥ गायत्र्या
च यथाशक्त्युपस्थाय दिवाकरं ॥ विभ्राडित्यनुवाकेन सूक्तेन पुरुषस्य च ॥ कि[illegible]ंकृत्ये ॥ ६१ ॥
न तथा मंडलब्राह्मणेन च ॥ पवित्रैर्विविधैश्चान्यैः सौरैर्मंत्रैश्च शक्ति

ऋस्य विश्वामित्र ऋ० सूर्यो देवता गायत्री० सहस्रशीर्षेति नारायण ऋ० पुरुष...
नु० अंत्यायास्त्रि० यज्ञाय त इति षण्णां शिवसंकल्प० त्रिष्टु० मनो दे० मंडले ...ना... ० सू
र्यो दे० जगती० सूर्योपस्थाने० ॥ उपस्थानांते पूर्ववत्प्रदक्षिणावर्तनं नमस्कारश्च ॥ यो
मी ॥ ॥ प्रदक्षिणं दृ सनमस्कृत्योपविश्य च ॥ दर्भेषु दर्भपाणिभ्यां प्राङ्मुख स्वस्थ कृतांज
लिः ॥ ३ ॥ स्वाध्यायं तु यथाशक्त्या ब्रह्मयज्ञार्थमाचरेत् ॥ आकेशाग्रान्नखाग्राच्च तपस्त
पेयदुत्तमं ॥ ४ ॥ यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहं ॥ आ हवा ऋष्यवे दंतु स्ना
तोऽह्नाप्नोपरिक्रमात् ॥ ५ ॥ यदधीतेऽन्वहं शक्त्या स स्वाध्याय इति स्मृतः ॥ ऋचो यजूंषि सा
मानि कथागाथामथापि वा ॥ ६ ॥ ॥ योगी ॥ ॥ मधुना पयसा चैव स देवांस्तर्पयेद्द्विजः ॥
पितॄन्मधुघृताभ्यां च ऋचोऽधीते हि योऽन्वहं ॥ ७ ॥ यजूंषि शक्तितोऽधीते योऽन्वहं स घृ

63

स्ति

५

॥द्वि॥ नामृतैः॥प्रीणातिदेवानाज्येनमधुनाऽपितृंस्तथा॥९॥सतुसोमघृतैर्देवांस्तर्पयेद्योन्वहं
पठेत्॥सामानितृप्तिंकुर्याच्चपितॄणांमधुसर्पिषा॥१०॥मेदसातर्पयेद्देवानथर्वांगिरसः
पठन्॥ ॥अंगिराः॥ ॥देशोच्चारोत्तरगुणःप्रकाशोपांशुमानसः॥जपोवेदोप्रमिषसंय
उक्तःसर्वपापहा॥११॥अनध्यायेप्ययंकार्यइत्याहभगवान्मनुः॥वेदोपकरणेचैवंज
पेध्येवतुनैत्यके॥१२॥नानुरोधोस्त्यनध्यायेहोममंत्रेषुचैवहि॥वेदोपकरणंवेदांगं॥ ॥
॥आपस्तंबः॥ ॥अथयदिवातोवावायात्स्तनयेद्वाविद्योततेवावस्फूर्जेद्वाएकांवाऋचं
मेकंवायजुरेकंवासामाभिव्याहरेदिति॥ ॥बृहस्पतिः॥ ॥ब्रह्मयज्ञप्रसिध्यर्थंविद्यांचा ॥द्वि॥
ध्यात्मिकींजपेत्॥जप्त्वाचप्रणवंवापिततस्तर्पणमाचरेत्॥१३॥ ॥मन [illegible] पमी
पेनियतोनैत्यिकंविधिमास्थितः॥सावित्रीमप्यधीयीततथारण्यं

श्रावयित्वा जलं पूर्वं परस्ताच्च विरम्यते ।। कुशानुत्तरतः क्षिप्त्वा[illegible]थाचमनम.
सपोयो निरयो निर्विष्णुरीडितः ।। याग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः ।। १६ ।। [illegible] ।। मा प
येत् ।। ।। इति श्री उपाध्याय नागदेव विरचिते आचारदीपे ब्रह्मयज्ञविधिः ।। ।। अथ स्वच्छतर्पणं ।।
तदहः सत्यव्रतः ।। ।। उद्धानेन विधानेन देवर्षिपितृतर्पणं ।। स्वशाखाविहितं कुर्यात् स्नानांगं पृथ
गेव हि ।। १ ।। ।। योगी ।। ।। अन्वारब्धेन सव्येन नाम्ना गोत्रेण वाग्यतः ।। आवाह्य पूर्वमन्मंत्रैरास्तीर्य
च कुशान् क्षितौ ।। २ ।। प्रागग्रेषु सुरांस्सर्वान् दक्षिणाग्रेषु वै पितॄन् ।। सव्यं जानुं ततो न्याच्य पाणि
भ्यां दक्षिणामुखः ।। ३ ।। तल्लिंगैस्तर्पयेन्मंत्रैः सर्वान् पितृगणांस्तथा ।। मातामहांश्च सततं श्र
द्धयेत महाबुधः ।। ४ ।। क्रिमिकैरैस्तथा कीटैर्युक्तं येन सदा स्वच्छं ।। तस्मादापोऽजले देयाः पितृ
नुद्दिश्य पयत्नतः ।। ५ ।। ।। हारीतः ।। ।। पात्राद्वाऽथ मादाय शुक्ले पात्रांतरे क्षिपेत् ।। ऊर्ध्वपूर्णे

॥हि०॥

॥द्वि२॥

थयागर्तेनस्थलेतुविबर्हिषि॥६॥ ॥पितामहः॥ ॥हेमरौप्यमयंपात्रंताम्रकांस्यसमुद्भवं॥पि
तृणांतर्पणेपात्रंमृन्मयंतुपरित्यजेत्॥७॥ ॥शंखः॥ ॥विनारूप्यसुवर्णेनविनाताम्रतिलै
स्तथा॥ विनादर्भैश्चमंत्रैश्चपितृणांनोपतिष्ठते॥८॥ ॥व्यासः॥ ॥मासेनराजतेनैवसुव
र्णोत्करनिर्गतं॥द्विमुहूर्तोतुताम्रेणत्र्याश्चेयच्चतिलोदकं॥९॥दर्भैःसप्तमुहूर्तेनमंत्रयुक्तं
तथाक्षयं॥तस्मान्मंत्रैर्विनाविप्रोनतर्पयतिवैपितॄन्॥१०॥ ॥योगी॥ ॥यच्छुष्कलंनिषि
चेलतिलान्संमिश्रयज्जलं॥ अतोन्यथातुसव्येनतिलाग्राह्याविचक्षणैः॥११॥येचपा
णितलेऽश्लिष्टारोमकूपेषुयेस्थिताः॥तैस्तिलैस्तर्पणंकुर्वन्पितृघातीभवेन्नरः॥१२॥
तस्मात्तेमणिबंधेतुकार्याविप्रैःप्रयत्नतः॥विशेषोयंस्थलेप्रोक्तोनः [illegible] च॥ ॥द
॥१३॥ ॥मरीचिः॥ ॥सप्तम्यांरविवारेचग्रहेजन्मदिनेतथा॥न्स्नप

लतर्पणं ॥१४॥ गङ्गाभ्यस्थ पृष्ठेषु नान्यगेहे कदाचिते ॥ न तर्पयेत्सिलन्नदेवा

न् ॥१५॥ ॥विष्णुपुराणात् ॥ ॥इदं चापि जलेऽंबुददेहालेख्य यानपाउपस्था छतदे

वाहितर्पणे ॥१६॥ ये मे कुले लुप्तपिंडाः पुत्रदारविवर्जिताः ॥ तेषां हि दत्तमक्षय्यमिदमस्तु सलिलो

दकं ॥१७॥ मातृवंशे मृता ये च पितृवंशे तथैव च ॥ तेषां हि दत्तमक्षय्यमिदमस्तु तिलोदकं ॥

॥१८॥ ॥योगी॥ ॥वस्त्रनिष्पीडितं तोयं श्राधीवोछिष्टभागिनां ॥ भागधेयं श्रुतिप्राह तस्मा

न्निष्पीडयेत्स्थले ॥१९॥ निःपीडनेन मंत्रस्य पूर्वमेव परांशरः ॥ जलमध्ये तु यः कुर्या द्विजा

तिह्रानदुर्बलः ॥२०॥ निःपीडयति वस्त्रांतं स्नानं तस्य वृथा भवेत् ॥ ॥योगयाज्ञवल्क्यः ॥ ॥

यावद्देवानृषींश्चैव पितॄंश्चापि न तर्पयेत् ॥ तावन्न पीडयेद्वस्त्रं येन स्नातो भवेद्द्विजः ॥२१॥ निः

पीडयति यः पूर्वं स्नानवस्त्रमतर्पिताः ॥ निराशाः पितरो यांति शापं दत्वा सुदारुणं ॥२२॥ ॥

ान्हि·

॥द्वि ४॥

॥शंखः॥ ॥एवंयःपूर्वमूनातिलतर्पयेदन्वहंद्विजः॥ सगच्छेत्सरमंस्थानंतेजोमूर्तिरनामयं॥२४॥
॥इतिस्छुलतर्पणं॥ अथऽळदेवतार्चनं॥ ॥तत्रयोगयाज्ञवल्क्यः॥ ॥निष्पीड्यस्नानवस्त्रं
तुआचम्यप्रयतःशुचिः॥ देवानामर्चनंकुर्याद्ब्रह्मादीनाममत्सरः॥१॥ आप्यवैक्षवरोद्रै
स्तुसावित्रैर्मैत्रवारुणैः॥ तल्लिंगैरेवमंत्रैस्तुअर्चयेत्तुसमाहितः॥२॥ ध्यात्वाप्रणवपूर्वं
तुदेवतास्तापथकुपथकु॥ नमस्कारेणमंत्रेणपुष्पाणिविनिवेदयेत्॥३॥ ॥समाचारो
पि॥ ॥ऊर्ध्वेचतुरस्रंपीठंकुरोनालिख्यतन्मध्येनवकोष्ठकान्विधायधर्मदेविदेवयेत्॥ तत्रा
दौगणनांचेतिप्रजापतिलिंगेनोगायत्रीगणेशार्चने॰॥ एतन्मंत्रेणाग्नेयकोणकेगंधा ॥८
क्षतपुष्पफलतोयादिभिर्गणेशायनमइतिगणेशमर्चयेत्॥ जातवेदसः रात
वैश्वानरस्त्रिष्टुप्दुर्गार्चने॰॥ ॐदुर्गायैनमःइतिइशान्येदुर्गामर्चे

प्रजापतिराद्दिस्त्रिष्टुप् ब्रह्मार्चने॰॥ ॐ ब्रह्मणेनमः इति मध्ये ब्रह्माणमर्चयेत्॥ इदंविष्णुरितिमे
धातिथिर्विष्णुर्गायत्रीविष्ण्वर्चने॰॥ ॐविष्णवेनमइतिदक्षिणेविष्णुमर्चयेत्॥ नमस्तेरुद्रम
न्यवइतिपरमेष्ठिरुद्रोगायत्रीरुद्रार्चने॰॥ ॐरुद्रायनमइतिउत्तरेरुद्रमर्चयेत्॥ गायत्र्यास
वित्रेनमइसूर्यंपूर्वे॥ मित्रस्यचर्षणीधृतइतिविश्वामित्रमित्रोगायत्रीमित्रार्चने॰॥ मित्रा
यनमइतिमित्रंनैरृत्ये॥ इमंमइतिवरुणायनमइतिवरुणंपश्चिमे॥ प्रजापतेनेतिप्रजापति
स्त्रिष्टुप् प्रजापतिः प्रजापत्यर्चने॰॥ ॐ प्रजापतयेनमइतिप्रजापतिंवायव्ये॥ ततोग्रहपूजा
नं॥ ॥ आकृष्णेनेति हिरण्यस्तूपः सविता त्रिष्टुप् सूर्यार्चने॰॥ सूर्यायनमइतिसूर्यंमध्ये॥
इमंदेवाइतिदेवासोमः सोमार्चने॰॥ ॐ सोमायनमइतिसोमंपूर्वे॰॥ अग्निर्मूर्द्धेतिप्रजा
पतिरग्निर्गायत्रीभौमार्चने॰॥ ॐ अंगारकायनमइतिअंगारकमाग्नेयां॥ उद्बुध्यस्वेति

॥ हि ॥

॥ द्वि ५ ॥

परमेष्ठ्यग्निस्त्रिष्टुप्बुधार्चने ॥ ॐ बुधायनम इति बुधं दक्षिणे ॥ बृहस्पत इति गृत्समदो बृह-
स्पतिस्त्रिष्टुप्गुर्वर्चने ॥ ॐ बृहस्पतयेनम इति गुरुं नैरृत्ये ॥ अंन्नात्परिस्रुत इति प्रजापत्यश्वि
सरस्वत्या शुक्रोऽजगती शुक्रार्चने ॥ ॐ शुक्रायनम इति शुक्रं पश्चिमे ॥ शन्नोदेवीरिति सने
नश्चानैश्चरायनम इति शनिं वायव्ये ॥ कांडात्कांडादिति अग्निर्दूर्वेष्टकानुष्टुप्राह्वर्चने ॥
ॐ राहवेनम इति राहुमुत्तरे ॥ केतुं कृण्वन्निति मधुच्छंदः केतवो गायत्री केत्वर्चने ॥ ॐ के-
तुभ्योनम इति ईशान्ये केतुं ॥ मध्ये ॐ वसुभ्योनमः ॥ कोणस्थाग्नेयकोणे ॐ रुद्रेभ्योनमः ॥
नैरृत्ये आदित्येभ्योनमः ॥ वायव्ये अश्विकुमाराभ्यांनमः ॥ ईशान्ये सर्वेभ्योदेवेभ्योनमः ॥
॥ मरीचिः ॥ ॥ इति पीठं समभ्यर्च्य श्रद्धया न्यासपूर्वकं ॥ पौरुषेण तु सूक्तेन ततो विष्णुं सम ॥ द्वि
र्चयेत् ॥ ४ ॥ ॥ वामनपुराणे ॥ ॥ ऊलिसीतासुमनसो कुंदं बकुपुटं तथा ॥ बाणं च चंपका

ज्ञो कंकरवीरं सपुष्पिकं ॥५॥ पारिजातं पाटलं च बकुलं गिरिशालिनी ॥ नीलकंठा सुवनजं पी
तकं नागकेसरपि ॥६॥ एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने ॥ सुरभीणि तथान्यानि व
र्ज्जयित्वा तु केतकीं ॥७॥ येषां हि संति पुष्पाणि प्रशस्तान्यर्चने विष्णोः ॥ पल्लवाश्चपि तेषां स्युः
फलान्यर्चाविधौ हरेः ॥८॥ ॥हारितः॥ ॥स्नानं कृत्वा तु ये केचित्पुष्पं गृह्णंति वै द्विजाः ॥ दे
वतास्तन्न गृह्णंति नप्रशंसं वै द्विजाः ॥९॥ ॥एतन्मध्याह्नस्नानविषयं ॥ न प्रातःस्नानवि
षयं ॥ ॥तथा चोक्त हारीतवचनं ॥ ॥अस्नात्वा तुलसिं छित्वा देवतापितृकर्मणि ॥ तत्सर्वं
निःफलं याति पंचगव्येन शुध्यति ॥१०॥ ॥अथ वर्ज्यान्याह ॥ ॥शाल्मलीसर्जबंधूकजपा
कुष्मांडपुष्पकं ॥ नार्कं चोन्मत्तकं कांचनं तथैव गिरिकर्णिका ॥११॥ न कंटकारिकापुष्पम
च्युताय निवेदयेत् ॥ कुटजं कांचनारोत्थं वर्जनीयं प्रयत्नतः ॥१२॥ दद्यात्पुरुषसूक्तेन

क॰।

९६।

पःपुष्पाण्यपएववा॥अर्चितंस्याज्जगदिदंतेनसर्वंचराचरं॥१३॥अनुष्टुभस्यसूक्तस्यत्रिष्टुबंतस्यदेवता॥
